The manuscripts under review add something, as was to be expected to our at present scanty knowledge with regard to Devachandra the teacher who laid the foundations of Hemachandra's learning

The Suriacharya of Devachandra

According to Jain accounts (Buhler's Hemachandra p 7 fg ) Hemachandra was born in the Vikrama year 1145=A D 1089 on the full moon day of the month Kartika His parents were of the Bania caste Chachiga and Pahini The mother was a pious disciple of the monk Devachandra. Once upon a time she dreamed a dream, and seemed to herself to be presenting to her honoured teacher the "chintamani" stone, that grants all desires Devachandra expounded this dream as meaning that she would bear a son who would be the Kaustubha jewel as it were, in the ocean of Jain learning Time passed and the son was born but the dream and its interpretation were forgotten When the young Changadeva—for such was Hemachandra's baptismal name so to speak—was five years old he accompanied his mother to the temple and to the surprise of all sat down on Devachandra's seat When Devachandra heard that this youth was Pahini's son he reminded her of the dream, and claimed the child He took him to Cambay where on the fourteenth day of the light half of the month Magha of the Vikrama year 1150= A D 1085 a Sunday, Changadeva received the first initiation and the new name Somachandra This legend undoubtedly means as Buhler points out that Devachandra, anxious to secure a successor, induced Pâhinî and her husband to part with the boy, that he might become a yati In theory, the ranks of yatis are recruited from persons who have been awakened to a sense of the idleness of worldly things, and who seek shelter from temptation in the quiet of the monastery In practice it was and is different The community procure the children of poor parents and present them to the yatis that the line of teachers may be kept up The illegitimate children of Brahminical widows are frequently the objects of their choice their mothers are willing and anxious to part with

them, and the stock of which they come gives promise of intellectual power What took place in Hemachandra's case it is impossible to say, but there is, at all events, no inherent probability in the account given by all the authorities as to his transfer from his parents to Devachandra at a very early age Rajasekhara tells us that Devachandra belonged to the Pûrnachandra gachchha and the line of Yasobhadra, a Rana of Vatapadra, who had been converted by Dattasûri Yasobhadra was succeeded by Pradyumnasuri, the author of many books, and Pradyumnasûri's scholar Gunasena was the teacher of Devachandra Rajasekhara adds that Devachandra was the author of a Commentary on the Sthananga and a "life of Sântin tha" This last, a Santinâthacharitra in Prakrit by Devachandra is referred to by the author of a later work in Sanskrit on the same theme, Devasuri (My First Report, p 59, App p 4 See under Devasûri for correction) No 50 of the Patan books is this Prakrit work of Devachandra After due meed of respect to his teacher whom he styles Gunasûri, Devachandra mentions *honoris causa* the following Jain sages 1 Indrabhûti This is the first disciple of Mahâvîra, otherwise called Gautama 2 Bhadrabhu Of this sage (No 7 with Klatt) Devachandra asserts that he composed in a book of 100,000 slokas a Vasudevarajacharitra 3 Haribhadra His Samaradityacharitra (in Prakrit) is referred to The Samarâdityacharitra hitherto known is a work in Sanskrit (No 1361 of this Report's Collection By Pradyumnasûri) That Haribhadra wrote such a work of the name was known from the list given at Weber II p 987 from the Ganadharasardhasataka A copy of it is among the books we are considering 4 Indrasûri Author of a Kuvalayamala 5 Siddhasûri Author of the Upamitibhavaprapanchakatha

The granthagra of the book is given at 12,100 This copy was the property of Śrî Devaprabhasuri, the pupil of Sri Yasobhadrasuri who was the pupil of Sri Vijayachandrasuri The scribe was a disciple of Sri Jinachandra

This is a complete copy of one of the old books quoted by Jayasomasuri in his Vichara（ratnasangraha (Third Report, p 13) The author's name is not Gurachandragani (as at p 17 and in foregoing Index) but Gunachandragani Our

Mahâvîracharitra (Mahâvîracharitra) by Gunachandra

author who wrote in Samvat 1139 gives the following account of his spiritual ancestry Beginning with Sudharman and Jambu the genealogy leaps to Vairasvamin in whose Śâkhâ (the Vajra Sâkhâ) arose the Chandra kula In the Chandra kula arose

(1) Vardhamana He had two pupils and successors

(2) Jinesvara and Budhisâgara Of Budhisâgara it is said that he was the author of a grammar and a work on metres These two teachers were succeeded by

(3) Jinachandra, whose authorship of the Samvegarangasâla is referred to He was succeeded by his fellow pupil

(4) Abhayadeva He was succeeded by

(5) Prasannachandra It was at the request of this teacher that Gunachandragani pupil of Sumati wrote this account of Mahâvira The book was composed under the following circumstances Jivadevasuri had a pupil Jinadattasuri, who converted the merchant Govardhana of Kappadavanijapura Govardhana built fifty two shrines to his new faith His wife was called Sodhi They had four sons Amrita, Siddha Jajjanâga, and Nanna After the death of Govardhana his first three sons migrated to the city of Chhattravalli Nanna remained in his native town The book was written to Siddha s order

Kumârapâlaprat bodha mal âkâvya by Somaprabhâchârya

This is a Prakrit poem on the conversion to the Jain faith of Kumârapâla At the end there is a praśasti in Sanskrit The work consists of five prastâvas. The account of the lineage of the author starts with these 'two wheels of the chariot of righteousness

(1) Munichandra and Mânadeva They where succeeded by

(2) — —tadevasuri (? Ajitadevasuri) He had many pupils, of whom the first in rank was

(3) Devasuri He was succeeded by

(4) Vijayasimhasuri He was succeeded by

(5) Somaprabhâchârya

Somaprabhâchârya wrote his poem in the house of Siddhapâla one of the court poets of Kumârapâla as his father Sripala had been one of the court poets of Siddharâja Mention is made of

*the fact that Siddharaja called Śrîpâla kavîndra and brother.* (This is the Srîpâla kaviraja of the Sârngaddharapaddhati). The poem was recited to Hemachandra's pupil Mahendramuni. This is the author of the Anekârthakairavakaumudî (First Report, p 51).

It was recited also to Vardhamâna and Guṇachandragaṇi.

The date Samvat 1241 is that of the composition of the work. It was written in Gurjarendrapura, *i. e*, Patan. The number of the slokas is 1,800. The copy now at Patan was written at Cambay by one Kheta to the order apparently of a disciple of Jatyatilaka.

Forty-eight of these manuscripts are dated, as follows :—

No. 1. Saptatikâchûrni. Samvat 1118=A.D. 1062. This is twenty years older than the oldest book in the Government of Bombay Collection of Palm-Leaf MSS.*

No. 2. Yogadṛishtisamuchchaya. By Haribhadra. With a commentary. Samvat 1146=A. D. 1090.

No. 3. Oghauiryukti. Samvat 1154=A.D. 1098.

No. 4. Pratikramaṇachûrni. Samvat 1178=A.D. 1122.

No. 5. Oghaniryukti. Samvat 1181=A.D. 1125.

No. 6. Jinadattâkhyânam. Samvat 1186=A.D. 1130.

No. 7. Parigrahapramâṇa. This is the notebook of the merchant Dhavala, containing the substance of the instruction Dharmaghosha gave him as to the duties incumbent upon the pious layman. Samvat 1186=A.D. 1130.

No. 8. Bhagavatîṭîkâ. By Abhayadeva. Samvat 1187=A. D 1131. Abhayadeva composed this book in 1128, and died in Samvat 1135, so that this copy was written only fifty-two years after the author's death.

No. 9. Śabdânuśâsanaṭîkâ. By Hemachandra. Samvat 1216= A. D. 1160. Hemachandra was alive when this copy of his grammar was written at Pattan, where it has remained ever since. He died in Samvat 1229. Bühler puts the composition of his Śabdânuśâsana in Samvat 1194-7, or only twenty years before this copy was written.

No. 10. Karmastavaṭîkâ. By Govindasûri. Samvat 1218=A. D. 1162. See my Third Report, App. p. 5.

No. 11. The Same. Samvat 1226=A. D. 1170.

No 12 Vighat lank ira Samvat 1227 = A D 1171

No 13 Uttaradhyayanatik i By Nemichandra Samvat 1228 = A D 1172

No 14 A t panna on the Nyayabindutika of Dharmottaracharya By Mallav idyacharya Samvat 1231 = A D 1175

No 15 Kumarapalapratibodhamal ikavya By Somaprabh i charya Samvat 1241 = A D 1185

No 16 Dasavaikalikat ka By Haribhadra Samvat 1248 = A D 1192

No 17 Nagananandan taka By Sriharsha Samvat 1258 = A D 1202

No 18 Dharmaratnalaghuvritti By Santisuri Samvat 1271 = A D 1215

No 19 Ling nus isana With the Commentary By Vamana Samvat 1273 = A D 1217

No 20 Nighantusesha By Hemachandra Samvat 1280 = A D 1224

No 21 Sabdanus isanavritti By Hemachandra Samvat 1288 = A D 1232

No 22 R shabhadevacharitra By Vardhamanasuri Samvat 1289 = A D 1233

No 23 Vrihatkalpasutra and Chûrni Samvat 1291 = A D 1235

No 24 Yogas strat ka By Hemachandra Samvat 1292 = A D 1236

No 25 Pindavisuddhi By Jinavallabha Samvat 1293 = A D 1237

No 26 Upadesamalatika By Siddharshi Samvat 1294 = A D 1238

No 27 Upadesakandali By Âsada With the Commentary of B lacl andra Samvat 1296 = A D 1240 See my Third Report, p 40

No 28 Śatapadî By Mahendrasuri Samvat 1300 = A D 1244 The book was composed in Samvat 1263

No 29 Sr ivakapratikramanas itracl rni By Vijayasimha Samvat 1317 = A D 1261 See Bhandarkar s Report 1883 4, where it is

mentioned, from Ratnaśekhara, who wrote a commentary on the Śrâvakapratikramaṇasûtra, that Vijayasinha wrote his chûrni on that work in Samvat 1183.

No. 30. Niśîthabhâshya. By Jinadîsamahattara. Samvat 1320 = A.D. 1264. See Klatt, Indian Antiquary, XI., p. 253, and Kielhorn's Palm-Leaf MSS. Report, p. 22.

No. 31. Pâkshikasûtravṛitti. By Yaśodevasûri. Samvat 1327 = A.D. 1271. This book was composed in Samvat 1180. See my Third Report, App. p. 128.

No. 32. Upadeśamâlâṭîkâ. By Siddharshi. Samvat 1331 = A.D. 1275.

No. 33. Chaturvinśatijinastotra. By Narachandra. Samvat 1334 = A.D. 1278.

No 34. Kalpasûtra with Kâlikâchâryakathâ. Illustrated. Samvat 1336 = A.D. 1280.

No. 35. Uttarâdhyayanaṭikâ. By Śântyâchârya. Samvat 1343 = A.D. 1287.

No. 36. Kalpasûtra with Kâlikâchâryakathâ. Samvat 1344 = A.D. 1288.

No. 37. Daśavaikâlikasûtra. Samvat 1352 = A.D. 1298.

No. 38. Kalpasûtra. Samvat 1354 = A.D. 1298.

No. 39. Hemakumâra (i. e., Hemachandra and Kumârapâla) -charitra. By Somaprabhâchârya. Samvat 1368 = A.D. 1312.

No 40. Śabdânuśâsanalaghuvṛitti. By Hemachandra. Samvat 1370 = A.D. 1314.

No. 41. Kalpasûtra with Kâlikâchâryakathâ. Samvat 1377 = A.D. 1321.

No. 42. Śântinâthacharitra. By Ajitaprabha. Samvat. 1384 = A.D 1328. A teacher of this name was lecturing in Samvat 1292. See Index.

No. 43. Śabdânuśâsanalaghuvṛitti. By Hemachandra. Samvat 1403 = A.D. 1347.

No. 44. Upadeśamâlâvṛitti. By Hemachandra (Maladhârin). Samvat 1425 = A.D. 1369.

No. 45. Âvaśyakavṛihadvṛitti. By Haribhadra. Samvat 1442 = A.D. 1384.

No. 46 Sutrakritangatikâ By Silankâchârya Samvat 1455=A D 1399

No 47 Anuyogadvârachûrni By Mahâsena Samvat 1456=A D 1400

No 48 Srâvakâtichâra Samvat 1466=A D 1410

Of the palm leaf manuscripts in the smaller Phophalia P do bhandar, the following seven are dated

No 1 Upamitibhavaprapanchakathâ By Siddharshi Samvat 1261=A D 1205.

No 2 Jitakalpachûrni With the Commentary of Śrîchandra Samvat 1284=A.D 1228

No 3 Antaraṅgasandhi By Ratnaprabha Samvat 1392=A D 1336.

No 4 Sabdânusâsana By Hemachandra Samvat 1297=A D 1241

No 5 Vitarâgastotra and other prakaranas, including the Viveka manjarî of Âsada Samvat 1372=A D 1316

No 6 Kâvyânusâsanavritti and Chhandonusâsanavritti. By Hemachandra Samvat 1390=A D 1334

No 7 Pratyekabudhacharitra Samvat 1398=A.D 1342

The library in the Sanghavinopâdo at Patan is known to be peculiarly rich in palm leaf manuscripts A list with extracts, was prepared for Dr Buhler by Narayana Shastri of Surat, but it has not been thought expedient to publish it in the absence of further examination *in situ* of the manuscripts themselves I hope I may be able to present it, after such examination, in my next report On the present occasion I was unable to obtain admission to this bhandar on account of the absence of the priest in whose charge it is His people showed me, however the books contained in a box that was lying in the outer court of the bhandar, and by good luck four of these were palm leaf ones Two are incomplete, and seem to be fragments of different books A third is a copy of the drama by Râmachandra, the famous one-eyed pupil of Hemachandra, which was first brought to notice by Dr Buhler (No 760 in his collection of 1875 6

The Raghuvilâsanâtaka of Râmachandra

Compare also his Hemachandra, p. 44). The copy in the Government collection is probably a copy of that in the Sanghavinopâḍo bhandar at Pâtan; but I am able from inspection of the latter to correct the title, which Buhler's Shastri gave incorrectly as Raghuvilâpanâṭaka. In the prologue Râmachandra boasts, according to the manner of Indian dramatists, of being the author of four other works, a Dravyâlankâra, Râghavâbhyudaya, Yâdavâbhyudaya and a Nalavilâsa. That Râmachandra was one-eyed appears to be a historical fact. Two legends are current with regard to the circumstance. According to the one, Râmachandra was one day taken before the sage Jayasinha, who bade him "have a single eye" to the furthering of the Jain faith. On this Râmachandra lost one of his bodily eyes! According to the other legend, the loss was a punishment for criticism passed by Râmachandra, in spite of the warning of his teacher, on a poem of Śripâla's. There appears to me to be an interesting reference to his semi-blindness in the opening verse of the Raghuvilâsa. It will remind the English student of the line:

"So much the rather Thou Celestial Light"

by a greater poet. The verse runs—

Satâm yah kevalâm dṛishtim hṛitâm atyugrakarmanâ

Tîrtvâ mohâbdhim anaishid Vîrâyasmai namo namah.

"All glory to that Vîra who, when their sins had removed the eye of faith of the good, crossed the ocean of illusion and brought it back."

The fourth of these books is a copy of a Yogasâra by an author whose name is not given. The manuscript is dated. It was written by the scribe Vâmakîrti for Amalakîrti, the pupil of Jayakîrti, in Samvat 1192, A. D. 1136.

## *EXTRACTS FROM MSS. PURCHASED FOR GOVERNMENT.*

---

### No. 1.

### अग्निब्राह्मणम् ।

आ०—उँ अग्निरिंद्रः प्रजापतिः सोमो य--णस्तटांगिरसः पूषा सरस्वतींद्राग्नी इडा निधनानि पदनिधनानीकारनिधनानीत्याग्नेयानि ।

च०—य एव वेद दुष्टता दुरुपयुक्ता न्यूनाधिका च सर्वस्मात्स्व-स्ति देवऋषिभ्यश्च ब्रह्म सत्यं च पातु मामिति ब्रह्म सत्यं च पातु मामिति ॥ ४ ॥ इत्यग्निब्राह्मण समाप्तम् ॥

### No. 2.

### अनुवाकपरिशिष्टम् ।

आ०—अथानुवाकान्वक्ष्यामि ब्रह्मणा विहितान्पुरा ।

विप्राणां यज्ञकालेषु जपहोमार्चनादिषु ॥ १

इषे त्वेंका वसो. पवित्रं तिस्रोऽग्ने व्रतपते सप्त पवित्रे स्थो द्वे ।

च०—एकीकृत्य समाख्यातं तु त्र्यधिक शतत्रय तु त्र्यधिकमि-त्यनुवाकसख्या समाप्ता ॥ इत्यनुवाकपरिशिष्टम् ॥

### No. 4.

### आज्यशस्त्रादि. ।

आ०—अथाज्यशस्त्रं अध्वर्युः पराङ्मुखो भवति तदा होता जपति ।

च०—शुमदग्ने सुवीर्य वर्षिष्टमनुपक्षिता ३ त्रि ।

आ०—अथ प्रउगशस्त्रं हि ३ भूर्भुव.स्वरों ३ शों ३ .सावों ३ वायुरग्रे गायत्रीः साक ।

च०—धियो विश्वा विराजतों ३ त्रिः ।

आ०—अथ मैत्रावरुणशस्त्रं हिं ३ भूर्भुवःस्वरों ३ शों ३ सावो ३मानो मित्रावरुणा घृतैर्गव्यूतिमुक्षतं ।

च०—ते स्याम देव वरुण ते मित्र सूरिभिः सह इषं स्वश्च धीमहे ३ त्रिः ।

आ०—अथ ब्राह्मणाच्छंसि शस्त्रं । हिं ३ भूर्भुवःस्वरों ३ शों ३-सावो ३मायाहि ।

च०—शिरः सखा श्यावह्मोमवावमत् उरुधारे वदो हर्तो ३ त्रिः।

आ०—अथाच्छावाकशस्त्रं । हिं ३ भूर्भुवःस्वरों ३ शों ३ सावो ३-मिंद्राग्नी आगत ।

च०—इन्द्राग्नी शर्म यच्छतो ३ शों ३ सावों ३ गोमद्धिरण्य-वद्वसु यद्वामश्वा वदामहे इंद्राग्नी तद्वने महो ३ ।त्रिः। इति प्रातःसवनम् ॥

आ०—अथ मध्यंदिनसवनं । हिं ३ भूर्भुव.स्वरो३मध्वर्यो शों ३ सावो ३ मा त्वा रथं यथोतये सुम्नाय वर्त्तयामसि...

अथ निष्केवल्यशस्त्रं । हिं ३ भूर्भुवःस्वरो३मध्वर्यो शों ३ सावो ३ मभित्वा शूरनो नुम्मो दुग्धा इव धेनवः...

अथ मैत्रावरुणशस्त्रं । हिं भूर्भुव स्वरो ३मध्वर्यो शों ३ सा-वों ३ कयानश्चित्र आभुवदूती सदा वृधः सखा...

अथ ब्राह्मणाच्छंसि शस्त्रं । हिं भूर्भुवःस्वरो ३ मध्वर्यो शों ३ सावो त वोदस्ममृतीपहं वसोर्मन्दानमधसः...

अथाच्छावाकशस्त्रं । हिं भूर्भुवःस्वरो ३ मध्वर्यो शों ३ सावो ३ तरोभिर्वो विदद्वसुमिंद्रं सबाध ऊतये ...

आ°—हिं ३ भूर्भुवःस्वरो ३ मध्वर्यो शो ३ सावो ३ तत्सवितुर्वृणीमहे वयं देवस्य भोजनं

च°—अधिभयो माहि न यज्जरिर्त्रो ३ त्रि इति तृतीयसवनं समाप्तम् ॥

## वृषाकपिशस्त्रम् ।

आ°—अथ वृषाकपिशस्त्रं । हिं ३ भूर्भुवःस्वरो ३ मध्वर्यो शोंशों ३ मावो ३ वयमुत्वामपूर्व्यस्यूरन्नकच्चिद्भर तो वस्यवः ॥

च°—बाहुभ्य आसगमेभ्यः । एव मे देवेषु वसुवार्याय । सूक्ता ब्रूहि ॥ इति वृषाकपिशस्त्रं समाप्तम् ॥

No. 11.

## इष्टकापूरणस्य भाष्यम्—याज्ञिकदेवः ।

आ°—उँ नम- - - - - - - - - - नमस्कृत्य- - - - - - -दायकम् । इष्टकापूरणस्याहं कुर्वे विवृतिमुज्ज्वलाम् ॥ १ ॥ अथातः सुप - - - - - - कातीयसूत्रशेष ऋजुपक्षस्यानुव्याख्यास्यामः । अत्राथशब्दो मंगलार्थः । आनन्तर्यार्थो वा···

इति पूरणभाष्ये याज्ञिकदेवकृतौ प्रथमा कण्डिका ॥

चयनमयनने यथायोगं योगशब्देन सर्वोयस्यो बाह्या इत्यादिवक्ष्यमाणयुक्तिरभिधीयते योगमनतिक्रम्य यथायोगम् ···

इति याज्ञिकदेवकृतौ पूरणभाष्ये द्वितीया कण्डिका ॥

लोक पृणाः विविच्य कथ्यन्त इति शेष.—द्विसाहस्री प्रथमा···

॥ ३ ॥ इति याज्ञिकदेवकृतौ पूरणभाष्ये तृतीया कण्डिका ॥

द्वितीयायाः स्रक्तिषु जंगमात्री द्वितीयाया नितौ सर्वासु स्रस्रक्तिदश···

॥ ४ ॥ इति श्रीयाज्ञिकदेवकृतौ पूरणभाष्ये चतुर्थी कण्डिका ॥
प्रथमया तृतीयोक्ता तृतीया चितिः प्रथमया चित्या उक्तः...
॥ ५ ॥ इति श्रीयाज्ञिकदेवकृतौ पूरणभाष्ये पञ्चमी कण्डिका॥
द्वितीयावचतुर्थी चतुर्थी चितिर्द्वितीयावद्भवतीति शेषः ...
॥ ६ ॥ इति श्रीयाज्ञिकदेवकृते पूरण------(अस्मात् पत्रमेकं गतम् )
॥ ७ ॥ इति श्रीयाज्ञिकदेवकृते पूरणभाष्ये सप्तमी कण्डिका ॥
अथ धिष्ण्यानां पूरणमुच्यते । सू° । धिष्ण्येषु न पादलोकाः ...
॥ ८ ॥ इति श्रीयाज्ञिकदेवकृतौ पूरणभाष्ये अष्टमी कण्डिका॥
सू० अथातः सर्वासां पक्वेष्टकानां समासेन संख्यां प्रमाणान्यनुव्याख्यास्यामः ।

च°—शास्त्रान्ते मंगलमाचरति ।

अयुतं च सहस्रं च शतं च सप्ततिस्तथा ।
संख्यैषा शांडिलस्याग्नेस्तस्मै च मुनये नमः ॥

इति श्रीसम्राट् स्थपत्यग्निचिदेकोनत्रिंशत्क्रतु[कृ]न्महायाज्ञिकप्रजापतिसूनुना याज्ञिकदेवेन कृतं पूरणभाष्यं समाप्तम् ॥ संवत् १६६७ अषाडादि श्रावणकृष्णद्वितीयायां तिथौ मृगशशिलांछनवासरे धनिष्ठानक्षत्रे अद्येह श्रीमदिलमहादुर्गाभ्यन्तरनागरज्ञातीयाग्निचित्सम्राट् स्थपतिमहायाज्ञिकश्रीगोपालसुतदेवीदासेन आत्मनां अध्यापनाय अन्येषामीक्षणाय च पूरणभाष्यं स्वयमेव लिखितम् । महाराजाधिराजश्रीभीमेन्द्रस्य साम्राज्ये । लेखकपाठकयोः स्वस्त्यस्तु ॥

No. 58.

## नैगेयानामृक्षु दैवतम् ।

आ०—ॐ नमः सामवेदाय ॥ ॐ अथार्षमार्चिकस्याग्निरेहि

त्वामग्ने भरद्वाजो बार्हस्पत्योग्नि मेधातिथिः काण्वः प्रेष्ठमुशकाव्य-स्त्वन्नः सुदीतिर्वार्हद्दिरसः सौहोत्रः पुरुमीढो वा तेवश्यः कण्वोग्ने सुमित्रो वाध्यश्वो वध्यश्वो वानूपः ॥ १ ॥...

प्रथमः प्रपाठकः ।

पुरुदीर्घतमा औतथ्यः प्रहोत्रेमेयजिष्ठो विश्वामित्रो गाथिनेग्ने राहूगणो गोतमो जज्ञानस्त्रित आत्य उत इरिंविठिः काण्व इडिश्व-नस्तस्यं श्रुटीव्यश्वमनावैयश्वोपभरद्वाजौ बार्हस्पत्यः ॥ १ ॥ ...

द्वितीयः प्रपाठकः ।

उत्तरा प्रगाथः काण्वो गिर्वणो विश्वामित्रो गाथिनः ...

तृतीयः प्रपाठकः ।

इमे वशिष्ठो मैत्रावरुण इमे शौनको गृत्समद ...

चतुर्थः प्रपाठकः ।

गृणे प्रगाथः काण्वो यस्य भरद्वाजो बार्हस्पत्य ऐंद्रनृमेध ...

पञ्चमः प्रपाठकः ।

उपसद्दे अमहीयुरांगिरसः पुनानो बृहन्मतिरांगिरस आविशन्न-सितः ।

षष्ठः प्रपाठकः ॥ इति छंदस्यार्षम्—

इंद्रशंयुर्बार्हस्पत्य इंद्रो वशिष्ठो मैत्रावरुणो यस्येदमुच्छुशेप. ...

आरण्यकमार्षं समाप्तम् ।

अथोत्तरमुपासितः काश्यपो देवलो वादविकश्यपो मारीचः ...

इति नैगेयानानृक्षुमार्षं समाप्तम् ।

इति प्रथमः प्रपाठकः ।

ॐ नमः ॥ वेदविद्भ्यो नमस्कृत्य नैगेभ्यस्तु विशेषतः ॥

तृचर्चार्धर्चपादानां तेषां वक्ष्यामि दैवतम् ॥ ...

च०—तृतीये देवाश्चतुर्थे एकादशे चाग्नि सप्तमे भद्र हे वैश्व-देव्यौ ॥ २० ॥ नैयानामृत्सु देवत समाप्तम् । द्वितीय प्रपाठक । ग्रन्थसख्या ३९६ सवत् १७२० वर्षे द्वितीयचैत्रवदी १ शनौ सूरजीसुतमाधवजी लिखितम् ॥

No 60

पाशुकानि चातुर्मास्यानि ।

आ०—ॐ नम शिवाय ॥ अथ चातुर्मास्यानि हौत्र लिख्यते । वैश्वानरपर्जन्येष्टि । सप्तदश सामिधेन्य ।

च०—पत्नीसजायादि पूर्ववत् । हृदयशूलोपस्थानान्त कर्म ॥ इति पाशुकानि चातुर्मास्यानि समाप्तानि । सवत् १७३९ वर्ष फाल्गुन-शुदि १ शनौ लिखित । दी । अनतेन ।

No 99

शुल्वसूत्रवृत्ति —रामचन्द्र ।

आ०—रामो निमिरवास्तव्य सोमपीथी गुरून् हरिम् ।
प्रणम्य वृत्तिमाधत्ते शुल्वसूत्रेष्वविस्तराम् ॥ १ ॥
उद्धृत्य सारभूतार्थं स्वकृताच्छुल्ववार्त्तिकात् ।
सूत्रार्थविवृतिद्वारा बालेभ्य प्रददे स्फुटम् ॥ २ ॥
रज्जुसूत्र वक्ष्याम ॥

च०—शुल्वे क्रतुकृता नेत्रे मखदशप्रकाशके ।
अबोधध्वान्तकलिते वृत्तिर्भेषजमस्त्विदम् ॥ १ ॥
उ ठेनु जनमोहपानवि[नि]रत त्रातु महीदेवता
देवैर्द्राश्रमनामराम उदभूत्तस्यानुकपापदम् ।
सम्राडन्वयगोपवाजिकसुतर्भानियज कृष्ण इ-
त्यास्ते तस्य कुले कृतेति विवृति शुल्वस्य राम स्फुटम् ॥ २ ॥

इति निमिषीयसोमसुद्रामचंद्राचार्यकृतायां शुल्वसूत्रवृत्तौ षष्ठी कंडिका समाप्ता ॥ संवत् १६३४ वर्षे चैत्रकृष्णभौमे अद्येह रेवातीरवास्तव्यनागरज्ञातीययाज्ञिकश्रीविश्वक -------

No. 105.

सामप्रकाशनम्–प्रीतिकरः ।

आ°–यो गजवदनचरणकमलं नत्वा सामप्रकाशनं ग्रंथम् ।
विरचयति सामसमूहात्प्रीतिकरस्सारमुद्धृत्य ॥ १ ॥

च°–|७|मिश्रितमिदमिति सुखदं कौतुकसहितं च दुर्घटं श्लोकैः ।..
प्रीतिकरेण यथाक्रममुदितं गानस्य सर्वस्वम् ॥
समाप्तमिदमिति सामप्रकाशनाख्यग्रंथम् ॥
श्वरामशरसंख्यापु[स्त] ग्रंथः प्रीतिकरेरितः ।
सामप्रकाशनाख्योय सम्यक्संपूर्णसामगान्
[ सपूर्णतामगात् ] ॥

No 106

सामब्राह्मणम् ।

आ°–प्रजापतिर्वा इदमेक आसीत्नाहरासीन्न रात्रि–
च°–मूर्धा यत्सर्वामृद्धिमृध्नुवति य एतदुपनयंति ॥ १८ ॥
इति पंचमः प्रपाठकः समाप्त. ॥ संवत् १४६० वर्षे

No. 117

सामरथन्तराणि चत्वारि ।

२९
अ°–॥ ॐ नमः सामवेदाय । रथंतराणि चत्वारि ॥ आ भि
र र र ४ १ २र र र र
त्वा शूर नो नु मो वा । आ दुग्धा इव धेनव ई शा नमस्य
१ १ र ७ १ ४ १
जगतः सु वा २३ र्दृशाम् । आ ईशा नमा २३ इंद्रा ३ । सू

४र र ५ २ १ २
स्थू २३४ पा नु वा ६ । हा उ वा । ई शो वा । नार्मिद्र सु-
र र र १ १ र
स्थुपो न त्वा वा३ अन्यो दिवि यः । न पा २३ र्थिवाः । न जा
२र १ ४ १ र र ५ ५
तो ना २३ जा ३ । ना ईप्या २३४ ता । उं वा ६ । हा उवा ।
२ १ २ र र र १ २
न जो वा । तोन जनिष्यते अश्वायतो मघवन्नो । इ वा २३ जिनाः ।
१ १ १ ४ १ र र ५ ५
गद्यं तस्त्वा २३ हा ३ । वा मा २३४ हा उं वा ६ । हा
उवा ॥ हु ॥ १ ॥

र १ २ ४ ५ र
च०—३ पा यि । अ मू ३ । चाथाः । पवमान महा २३
१ १ २ १ १ १ १ १ ११
होइ । त्वा ना ३१३ वा २३ इ ट् इ डा २३४५७ इति षष्ठः
प्रपाठकः । संवत् १७०२ वर्षे पोषसुद ८ भोमे त्रवाडी कीकासुत
जीवा तथा गणेश तथा गोपालजी तथा नारायणजी हरजी मुकुं-
दजी । त्र० गोपालजीयेन लिखितम् ॥

No. 120.

सोमोत्पत्तिः ।

आ०—अग्निहोत्रं हुतासीनं गार्ग्यं वृद्धि[द्धं] महामुनिम् ।
विनये[विनयेनो]पसंक्रम्य भागुरिः परिपृच्छति ॥ १ ॥

च०—इति सोमोत्पत्तिः । संवत् १७४४ वर्षे शाके १६०९
प्रवर्त्तमाने उत्तरायणगे मासोत्तम अषाडमासे कृष्णपक्षे पञ्चमी श-
निवासरे अध्यारु शिवरामेण लिखितं त्रवाडि जागेश्वरपठनार्थम् ।

No. 203.

दत्तकसिद्धान्तमञ्जरी—बालकृष्णः ।

आ०—प्रणम्य पर(मात्मानमद्वै)तानंदविग्रहम् ।
क्रियते युक्तिमुक्ताभिर्दत्तसिद्धांतमंजरी ॥ १ ॥

मान्यान्प्रणम्य विहितांजलिरेष भूयो
भूयो विधाय विनयं विनिवेदयामि ।
दृष्यं वचो मम परं निपुणं विभाव्य
भावावबोधविहितो न दुनोति दोषः ॥ २ ॥

ष०–इति शौनकरीत्या पुत्रप्रतिमहविधिः ॥
सतां संतोषसिद्ध्यर्थं दत्तसिद्धांतमंजरी ॥
अकारि बालकृष्णेन तेन तेषां मुदेऽस्तु सा ॥ ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यसर्वतंत्रस्वतंत्रश्रीमदद्वैतानंदभगवत्पादारविंदभृंगायमानांतःकरणेन श्रीमत्पल्हनीटकरकुलोत्तंसश्रीमद्देवभट्टदीक्षितपंडितात्मजेन बालकृष्णशर्मणा विरचिता दत्तसिद्धांतमंजरी समाप्ता ।

No. 246

प्रवरमञ्जरीसारोद्धारः—शंकरदैवज्ञः ।

आ०–विघ्नौघध्वांतविध्वंसमार्तंडं सिंदुराननम् ।
ब्रह्मादिविबुधैः सेव्यपादपद्मं भजाम्यहम् ॥ १ ॥
रणत्र[ नू ]पुरसंस्कारैः क्वणद्वीणादिवादनैः ।
जातहर्षां प्रफुल्लास्यां भारतीं भावयाम्यहम् ॥ २ ॥
बौधायनादिसूत्राणां व्याख्याकृद्भिः पुरातनैः ।
प्रपंचितं विस्तरेण तत्संक्षिप्य मयोच्यते ॥ ३ ॥
विवाहसिद्ध्यै किल वैदिकानामुर्वीसुतानामवहुश्रुतानाम् ।
संदोहगोत्रप्रवरानुपूर्व्या विरच्यते शंकरतांत्रिकेण ॥ ४ ॥

ष०–इत्थं सगोत्रप्रवरः संदोहः परिगुंफितः ।
आदरेण बुधैर्भाव्यः क्षम्यतां मम साहसम् ॥

इति श्रीमच्छियात्मजशंकरदेवज्ञविरचिते प्रवरमंजरीसारोद्धारे गोत्रप्रवरनिर्णयः समाप्तः ॥ ॥

No 281.

रुद्रकल्पद्रुमः—अनन्तदेव ।

आ०—सिद्धिबुद्धिप्रदातारं विघ्नव्यूहविदारणम् ।
महागणपतिं वंदे लक्ष्मीविष्ण्वादिभिर्नुतम् ॥ १ ॥
सच्चिदानंदरूपाय शिवादेहार्धधारिणे ।
नम ॐकारवाच्याय शिवायाभीष्टदायिने ॥ २ ॥
श्रीनृसिंह रमानाथ सच्चिदानंदविग्रहम् ।
विधीन्द्रोपासितं वंदे भक्तकल्पमहीरुहम् ॥ ३ ॥
कात्यायनान्गुरूंन्नत्वा श्रीमदुद्धवसूनुना ।
तन्यतेऽनंतदेवेन रुद्रार्चापद्धतिर्मया ॥ ४ ॥
पद्धत्यो विविधा अन्या स्फुटा सतीह यद्यपि ।
नाभ्यस्तस्या विशेषो यः पश्येत् सोऽवधार्यताम् ॥५ ॥

अथ काण्वमाध्यंदिन्यादिवाजसनेयीशाखानुसारेण रुद्राभिषेकप्रयोग उच्यते ॥· ...

पत्रे ८६ इति श्रीमद्द्विवेदी उद्धवसूनुना द्विवेदीदेवानुजेन द्विवेदी श्रीमदनंतदेवेन विरचिते श्रीरुद्रकल्पद्रुमे रूपकाख्याद्यरुद्राभिषेकपद्धति. समाप्तिमगमत् ॥ अथ द्वितीयो रुद्र उच्यते ॥

च०—धीमतानंतदेवेन श्रीमदुद्धवसूनुना ।
त्रैवेद्यमोढसंज्ञेन काशीपुरनिवासिना ॥ १ ॥
श्रुतिस्मृतिभ्य उद्धृत्य रुद्रकल्पद्रुमोऽर्पित ।
मदीयनाथयोर्विष्णुवद्ययो शिवपादयो ॥ २ ॥
मुहुर्मुहु प्रार्थयेह सज्जनान् शुद्धमानसान् ।
मयोक्तमिह सशोध्य विचार्य सदसच्च यत् ॥ ३ ॥

यश्च श्रमः समुत्पन्नो ग्रंथस्यास्य विलेखने ।
सर्वात्मा तेन विश्वेशः प्रीयतां परमः शिवः ॥ ४ ॥

इति श्रीमद्द्विवेदी उद्धवसूनुना द्विवेदीश्रीदेवानुजेन द्विवेदी अनंतदेवेन ---------------

No. 285.

लघुकारिका—कर्काचार्यः ।

आ°—श्रीदेवदत्तोप्यविनायकः पुरा
माध्यंदिनीयोप्यथ गौडवासी ।
श्रीविष्णुशर्मा इति तस्य नंदनः
स कारिकाकारतया बभूव ॥ १ ॥

च°—चतुर्विंशतितंतूनां वशिष्ठो वाक्यमब्रवीत् ।
अधिकारी सपत्नीको दंपत्योरुपविष्टयोः ।
जलेशाभिमुखी दद्यात्प्राङ्मुखो यः[ष्य] प्रयोगतः॥ २७१॥

इति श्रीकर्काचार्यविरचिते लघुकारिकायां यजुर्वेदब्रह्मसूत्रे --- प्रकाशः ॥

No. 296.

विष्णुभक्तिचन्द्रोदयः—नृसिंहारण्यमुनिः ।

आ०—वंदेहं श्रीनृसिंहेशं पुण्यारण्य प्रभूपमम् ।

च°—श्रीमन्नृसिंहमुनिना ख्यातो धर्मप्रकाशकः ।
विचार्य धर्मशास्त्राणि चक्रे ग्रंथं महामुनिः ॥
बुद्धिप्रेरककृष्णस्य पादपद्मं प्रसीदतु ।
ध्यानासमर्थजीवानामस्माकं सर्वदा स्वतः ॥

इति श्रीश्रीमन्नृसिंहारण्यमुनिविरचिते श्रीविष्णुभक्तिचंद्रोदये एकादश्यादिमाहात्म्यं निर्णयषोडशकलाप्रकरणम् ॥

No 396

भागवतामृतम् ।

आ° श्रीगोपकुमार उवाच ॥

ब्रह्मलोकादिमा पृथ्वीमागच्छन् दृष्टवानहम् ।
पूर्वं यत्र यदासीत्तद्यथोऽप्यस्ति न कुत्रचित् ॥

च°—अथ श्रीरामेण प्रचुरकरुणाकोमलहृदा
जगच्चित्तज्ञेन प्रणयमृदुनाश्वास्य वचसा ।
व्रज द्वारावत्या सुखमिति समादिश्य गमितः
सम ता भक्तुकावल्लिपरिवृढेनाहमचिरात् ॥

इति श्रीभागवतामृतनाम्नीतिहासे गोलोकमाहात्म्यखण्डे वैकुण्ठनामा चतुर्थोऽध्याय ॥

No 402.

हरिलीला—बोपदेव ।

आ°—नम कृष्णाय नित्यैकसच्चिदानन्दमूर्त्तये ।
जगत्सर्गविसर्गादिसाक्षिणे चिन्त्यशक्तये ॥ १ ॥
श्रीमद्भागवत स्कन्धाध्यायार्थादि निरूप्यते ।
विदुषा बोपदेवेन मन्त्रिहेमाद्रितुष्टये ॥ २ ॥
आनन्दस्य हरेर्लीला वक्ता भागवतागम ।
स्कन्धैर्द्वादशभि शाखा प्रतन्वन् द्विजसेवित ॥ ३ ॥
सा च द्वितीये दशमे दशधाऽर्थाश तद्यथा ।
अत्र सर्गो विसर्गश्च स्थान पोषणमूतयः ॥ ४ ॥
मन्वन्तरेशानुकथा निरोधो मुक्तिराश्रय ।
सर्गादयस्तृतीयादिस्कन्धेषूक्ता दश क्रमात् ॥ ५ ॥
श्रोतुर्नृकुथ लक्ष्मावे द्वितीये श्रवणे विधिः ।
इतीद द्वादशस्कन्ध पुराण दशलक्षणम् ॥ ६ ॥

च°—इति भागवते लीलानुक्रमणी रमणी कृता ।
विदुषा बोपदेवेन विद्वत्केशवसूनुना ॥ १७५ ॥
हरिलीलाविवेकोऽयं हरिभक्तैर्विलोक्यताम् ।
अस्याविलोकनादेव हरौ भक्तिर्विवर्धते ॥ १७६ ॥
अतत्त्वे तत्त्वधीर्येषा तत्त्वे चातत्त्वधीर्नृणाम् ।
न तानानदयत्वेता बोपदेवस्य सूक्तयः ॥ १७७ ॥
यस्य व्याकरणे वरेण्यघटना, स्फीताः प्रबंधा दश
प्रख्याता नव वैद्यकेऽपि तिथिनिर्धारार्थमेकोद्भुतः ।
साहित्ये त्रय एव भागवततत्त्वोक्तौ त्रयः सस्यभु-
व्यतर्वाणिशिरोमणेरिह गुणाः के के न लोकोत्तराः ॥१७८
इति श्रीबोपदेवपंडितविरचिता हरिलीला समाप्ता ।

No. 448

न्यायसारः—माधवदेवः ।

आ°—नत्वा विश्वेश्वरं देवं गुरुं श्रीलक्ष्मणाभिधम् ।
द्रव्यादीनां पदार्थानां विवेकः क्रियतेऽधुना ॥ १ ॥

च°—इति धारासूरनिवासिलक्ष्मणदेवात्मजमाधवदेवविरचितो न्यायसारः समाप्तो ऽयम् ॥

श्रीमन्माधवदेव इत्यभिहितो ब्रह्मांडभांडोदरे
सूरिः सूर्यनिभः शरत्कुमुदिनीबंधुप्रभाधीरभूत् ।
तत्रद्राविडधीकृताखिलजगच्छ्रीमाधवः सूरिराट्
तंत्रार्थं निखिलं विचार्य विदधौ श्रीन्यायसारं सुधीः ॥१॥
गोदातीरविभूषण पृथुयशाः श्रीलक्ष्मणाख्यः सुरो
धारासूरपुरे स्थितोऽखिलजगद्वयोर्जुनानुमही ।
तत्सूनुस्त्रिपुरारिराजनगरे श्रीन्यायसाराभिध
मथ माधवदेवपंडित इमं शास्त्राकरोदाकरम् ॥ २ ॥

## No. 481.

### उक्तिरत्नाकरः—साधुसुन्दरः ।

आ०—स्मृत्वा श्रीभारतीं देवीं गुरुपादांश्च भक्तितः ।
उक्तीनां संग्रहं वक्ष्ये स्वान्ययोर्हितहेतवे ॥ १ ॥

च०—खरतरेअणुपाद्य[तरमतपायो]राशिवृद्धौ मृगांका
यत्तनपतिसभायां ख्यापिताईन्मताज्ञाः ।
प्रहतकुमतदर्पाः पाठकाः साधुकीर्त्ति-
प्रवरसदभिधानापिवासिंहा [नाःसिंहतुल्या] जयतु ॥
तेषां शास्त्रसहस्रसारविदुषां शिष्येण शिक्षाभृता
भक्तिस्थेन हि साधुसुंदर इति प्रख्यातनाम्ना मया ।
ग्रंथोयं विहितः कवीश्वरवनोवुद्धयोक्तिरत्नाकरः
स्वान्यानां हितहेतवे बुधजनैर्मान्यश्चिरं नंदतु ॥

इति श्रीउक्तिरत्नाकरः संपूर्णः ॥

## No. 485.

### कातन्त्रदोर्गसिंहीवृत्तिष्टीकासमेता ।

मू० आ०—राज्याभिषेके कनकाचलस्थः
सर्वांगदिव्याभरणाभिरामः ।
श्रियेऽस्तु वो मेरुशिरोवतंस-
कल्पद्रुकल्पः प्रथमो जिनेंद्रः ॥ १ ॥

देवदेवं प्रणम्यादौ सर्वज्ञं सर्वदर्शिनम् ।
कातंत्रस्य प्रवक्ष्यामि व्याख्यानं शार्ववर्मिकम् ॥ १ ॥

सिद्धो वर्णसमाम्नायः । सिद्धः खलु वर्णानां समाम्नायो वेदितव्यः । न पुनरन्यथोपदेष्टव्य इत्यर्थः । सिद्धशब्दोत्र नित्यार्थो निष्पन्नार्थः प्रसिद्धार्थो वा । यथा सिद्धमाकाशं सिद्धमन्नं कांपील्ये सिद्धो देवदत्त इति ॥

टी° आ°—ॐकारं बिंदुसंयुक्तं यं ध्यायंतीह योगिनः ।
कामदं मोक्षदं तस्मै ॐकाराय नमो नमः ॥ १ ॥
अविरलशब्दमयौघा प्रक्षालितसकलभूतलकलंका ।
मुनिभिरुपासिततीर्था सरस्वती हरतु दुरितं नः ॥ २ ॥
पट्टकं निश्चलं कृत्वा यथा मेरुं सुनिश्चलम् ।
स्वोपाध्यायं नमस्कृत्य ततो व्याख्यानमारभेत् ॥ ३ ॥
देवदेवं प्र° ४
प्रणम्य योगिभिर्ध्येयं जिनं सज्ज्ञानभास्करम् ।
शब्दशास्त्रप्रणेतारं वक्ष्ये मुग्धप्रबोधकम् ॥ १ ॥

दिवुच् क्रीडाजयेच्छापणिद्युतिस्तुतिकांतिगतिषु । दिव् दीव्यंति क्रीडति स्वर्गेऽप्सरोभिः सह विलसंतीति देवाः ।

मू° च°—दोवारिकः द्वौवा[द्वा]रपालिकः सौवरः [श्वः] एवमन्येऽप्यनुसर्त्तव्याः । इति दौर्गसिंह्यां वृत्तौ तद्धितप्रकरणं समाप्तम् ॥

टी° च°—द्वारे नियुक्तो दौवारिकः तेन दी° कण्प्र° पश्चात् अनति° द्वारादीनां चा(वा)पदाद्योरपि वृद्धिः । इति दौर्गसिंह्यां वृत्तौ तद्धितप्रकरणं द्वदकम् ॥ ॥

No. 486.

कातन्त्रशिक्षासंदोहः—वा—कलापव्याकरणसूत्राणि ।

आ°—उक्तानुक्तदुरुक्तानां चिंता यत्र प्रवर्त्तते ।
तच्छास्त्रं वार्त्तिकं प्राहुर्वार्त्तिकज्ञा विपश्चितः ॥ १ ॥

च°—कृताकृतप्रसंगि यल्लक्षणं तन्नित्यं लक्षणसन्निपाते तदनुपरोध्य कार्यमिति । कातंत्रे परिभाषासूत्रसंदोहः समाप्तः ॥

ॐ नमः पार्श्वनाथ ॥ अष्टौ स्थानानि वर्णानां...
हकारं पंचमैर्युक्तमंतस्थाभिश्च [मंतःस्थैश्चाभि]संयुतम् ।
उरस्यं तं विजानीयात्कंठ्यमाहुरसंयुतम् ॥ १ ॥

इति कातन्त्रे शिक्षासंदोहः समाप्तः ॥ इति कलापव्याकरणसूत्राणि संपूर्ण[र्णानि] ॥

No. 487.

## कातन्त्रोत्तरं सिद्धानन्दापरनामकम्—विजयानन्दः ।

आ०—नाम्ना । वस्तुवाचीनीति । ननु किं भावरूपमथाभावरूपं यदि वोभयरूपमाहोस्विद्भावाभावविनिर्मुक्तं वस्त्विति । . . .

च०—अथः शिरसा वेदतिस्यं । अथ स्यन्द तिरस्यन्दि नमस्करोति पुंस्करोति च दृश्यते । योपचति तु नेद लक्षणम् । अन्वो भोजनमित्यादि ॥

इति विजयानन्दविरचिते कातन्त्रोत्तरे सिद्धानन्दापरनाम्नि समासप्रकरण समाप्तम् ॥ .

No 495

## दशबलकारिका ।

आ०—ये धातव. संति गणांतरेषु वर्णार्थनिर्देशपदैरभिन्ना. ।
विभिन्नशब्दप्रतिपादनार्थं रूपाणि तेषां समुदाहरिष्ये ॥ १ ॥

च०—य' शक्ल शक्तौ कथितो दिवादौ
स तु प्रसिद्धः स्वरितानुबंधः ।
रूपद्वयं शक्यति शक्यते च
शक्नोति नद् यस्य तु शक्नुते न ॥ ३६ ॥

द्वात्रिंशता श्लोकनिबंधनेन
धातूनसौ स्वीकृतवान्महार्थी' ।
स व्यापकोथ सुतरां प्रसिद्धो
मलीतरो विंशतितुल्यभाग' ॥ ३७ ॥

दृष्टिस्ते विषमा तनो विरविता भूतिर्मुखे पंचता
पाणौ ब्रह्मशिरो गले च गरलं दोषाकरो मस्तके ।
एतेनैव परिच्छदेः पशुपते के त्वां नमस्कुर्वते
यद्येषा सुरवृंदवंदितपदा मौलौ न भागीरथी ॥ ३८ ॥

इति दशबलकारिका समाप्ता ॥ संवत् १७८३.

No. 500.

न्यायार्थमञ्जूषा—हेमहंसगणिः ।

आ०—ॐरूपाय नमः श्रीमद्धेमव्याकरणाय च ।
श्रीसोमसुंदरगुरूत्तंसाय च नमो नमः ॥ १ ॥

अथ ये तु शास्त्रे सूचिता लोकप्रसिद्धाश्च न्यायास्तदर्थं यत्नः क्रियते ।

स्वरूपं शब्दस्याऽशब्दसंज्ञा ॥१॥
सुसर्वार्धदिक्शब्देभ्यो जनपदस्य ॥२॥

च०—श्रीसूरीश्वरसोमसुंदरगुरोर्निश्शेषशिष्टाग्रणी-
र्गच्छेंद्रः प्रभुरत्नशेखरगुरुर्देदीप्यते सांप्रतम् ।
तच्छिष्याभमहेमहंसगणिना न्यायार्थमंजूषिका-
वक्षस्कार इहांतिमोऽम्बुधिमितः सन्न्यायरत्नैर्भृतः ॥४॥...
श्रीमच्चांद्रकुले पुराजनि जगच्चन्द्रो गुरुर्यस्तपा-
चार्यस्याभिमवाप तीव्रतपसा तस्यान्वये जायते ।
प्रौढश्रीनरदेवसुंदरगुरुस्तत्पट्टपूर्वाग्निरेः
शृंगे श्रीप्रभुसोमसुंदरगुरुर्भानुर्नवीनोऽभवत् ॥ ७ ॥

यतः ।

भानोर्भानुशतानि षोडश लसत्येकत्र मासयाश्विने
यच्छिष्यास्तु ततोऽधिका अपि मर्त्यसुद्योतयंते सदा ।

तस्याह चरणानुपासिषि सदा श्रीमत्तपागच्छप-
क्षोणीविश्रुतसोमसुंदरगुरोश्चारित्रिचूडामणे( ) ॥ ८ ॥

अपि च ।

मारिर्येन निवारिता सुरकृता ससृज्य शांतिस्तवं
स श्रीमान्मुनिसुंदराभिधगुरुर्दीक्षागुरुर्मेऽभवत् ।
यस्य श्यामसरस्वतीति बिरुदं विख्यातमुर्वीतले
गुर्वी श्रीजयचंद्रसूरिगुरुरप्याधात्प्रसत्तिं स मे ॥ ९ ॥
सांप्रतं तु जयति श्रीरत्नशेखरसूरयः ।
नानाग्रंथकृतस्तेपि पूर्वाचार्यानुकारिणः ॥ १० ॥
एतानाचार्यहर्यक्षान्प्रत्यक्षानिव गौतमान् ।
वीतमाय स्तुवे स्फीतश्रीतपागच्छनायकान् ॥ ११ ॥

किंच ।

हैमव्याकरणं महार्णवमिव व्यालोड्य मंजूषिका-
सपूर्तिप्रमितान्यऽमून्यधिजगत्सन्न्यायरत्नानि यत् ।
तत्सर्वं यदयाप्रबोधकणिकासिद्धौपधीजृंभितं
विद्यासिद्धमिमं हृदि प्रणिदधे चारित्ररत्नं गुरुम् ॥ १२ ॥
चिन्मयानां मयामीषामृषीणां सुप्रसादतः ।
हेमहंसाभिधानेन वाचनाचार्यतानुजा ॥ १३ ॥
श्रीमद्विक्रमवत्सरे तिथितिथौ१५१५शुक्लद्वितीयातिथौ
पूर्वाह्णे मृगलांछने मृगशिरःशृगामचग्गारिणि ।
शुक्रस्याहनि शुक्रमासि नगरे श्रीसागरेऽहम्मदा-
वादे निर्मितपूर्त्तिरेष जयताद्ग्रंथः सुधीवल्लभः ॥ १४ ॥

इति श्रीतपागच्छपुरंदरश्रीसोमसुंदरसूरिस्वदीक्षागुरुश्रीमुनिसुंदर-
सूरिश्रीजयचंद्रसूरिप्रमुखश्रीगुरुसांप्रतविजयमानश्रीगच्छनायकपरमगु

ग्श्रीरत्नशेखरसूरिचरणकमलसेविना महोपाध्यायश्रीचारित्ररत्नग-णिप्रसादप्राप्तविद्यालवेन वाचकश्रीहेमहंसगणिना स्वपरोपकाराय संवत् १५१५ वर्षे ज्येष्ठसुदि द्वितीयायां निर्मितेयं न्यायार्थमंजूषा-नाम्नी न्यायवृहद्वृत्तिश्चिरं नंदतात् ॥

.प्रत्यक्षरं गणनया ग्रंथेऽस्मिन्मानमागतम् ।
सहस्रत्रितयी पंचाशीतिः श्लोकाश्च साधिकाः ॥ १५ ॥

ग्रंथाग्रं श्लोकाः ३०८५ अक्षर २१ ॥ श्रीन्यायार्थमंजूषानाम्नी न्यायवृहद्वृत्तिः संपूर्णा । सूत्रसहितवृत्तिग्रंथाग्रं श्लोका ३१५४ ॥

No. 502.

परिभाषाभास्करः—अग्निहोत्री हरिभास्करः ।

आ०—आखण्डलादिसुरमण्डलमण्डनं त-
मुद्दण्डकोकविरहानलदण्डचण्डम् ।
ईडे ऽहमत्र बहुशोधितपद्मखण्डं
मार्त्तण्डमंधतमसं प्रति कालदण्डम् ॥ १ ॥
श्रीगुरून् पितरौ नत्वाऽग्निहोत्री भास्कराभिधः ।
भास्करं परिभाषाणां तनुते बालबुद्धये ॥ २ ॥
युक्तायुक्ताभिज्ञं वन्द्यं भूयो २ विद्वद्वृन्दम् ।
नामं नामं याचे मंदो मांद्यं चेदं शोध्यं सम्यक् ॥ ३ ॥
मङ्क्षी मङ्क्षीकया तुल्या खरैरिव खलैर्यदि ।
नादृतेयं कृतिस्तस्मादस्माकं हानिरस्ति का ॥ ४ ॥

च०—अव्यभिचारि सत्यम् । अत्रोत्तत्तिमत्स्वपि पदार्थेषु स-म्बन्धः संबंधं न व्यभिचरतीति तत उत्पन्नो भावप्रत्ययः ॥ क्रिया-संबंधेनाहादिषु सामान्यम् । इदं न भर्तृहरेर्वचनम् । यत्तु मथुरा-नाथभट्टाचार्या वदंति पाणिनिवचनमिदमिति तदतिरभसादिति ध्येयम् ।

केचित्तु व्याख्यानतो विशेषप्रतिपत्तिरित्यादि सर्वा परिभाषा व्याडिमुनिना रचिता इत्याहुः ॥

परिभाषाकमलिनीर्युक्तिरुग्भिर्विकाशयन् ।
भास्करः पण्डितालीनां स्वांतमानंदयत्वयम् ॥

इति श्रीमदग्निहोत्रिवंशावतंसहरिभट्टात्मजापाजिभट्टसुतापराभिधानहरिभास्करकृत. परिभाषाभास्कर. समाप्तिमगात् ॥१ ॥

No 530

लघुसारस्वतम्—कल्याणसरस्वती ।

आ°—मातरंपितरौ श्रीशौ नत्वा केन त्रिदं गुरुम् ।
लघुसारस्वतं कुर्वे श्रीकल्याणसरस्वती ॥ १ ॥

च°—आदेशाच्छ्रीसरस्वत्या गुरुपादानुवंदनात् ।
बालानां शीघ्रबोधाय कृतं सारस्वतं लघु ॥ १ ॥

इति श्रीलघुसारस्वतं सपूर्णम् ॥

No. 540.

सारस्वतटिप्पणम्—क्षेमेन्द्रसूरिः ।

आ°—ॐ नमः सरस्वत्यै ॥

तदर्थतत्त्वाभिनिविष्टबुद्धि-
र्गर्वप्रतिक्षेपकयुक्तिलेशैः ।
अल्पैः पदैर्व्याकरवाम कामं
सारस्वतं व्याकृतमन्यदीयैः ॥ १ ॥

प्रारिप्सितविघ्नसमाप्तिशिष्टाचारावनाभ्यां प्रणतेष्टदेवाः ।
श्रोतृप्रवृत्त्यै विषयादि तावदाचार्यधुर्या इह संगिरन्ते ॥ १ ॥

प्रणम्य° सारस्वतीं प्रक्रियामृजु कुर्वे इत्यन्वयः ।

च°—लोकाच्छेषस्य सिद्धिरिति सूत्रबलादस्माभिर्दिङ्मात्रमुक्तम् ।
स यतिः प्रक्रिया शुभामिति ऋजुमित्यर्थः ॥ छ

कृष्णा ( भय ) श्रीनरगोपसत्तिमवाप्य संमाममनिमकर्वः ।
क्षेमेंद्रद्यारिरिभिरन्नुः सारहतेे टिप्पणमभ्यधत्त ॥ १ ॥
व्याख्यागुणालरीक्षेत्र निरं नंदंतु ----------

No. 375.

परमार्थबोधः—मुकुन्दः ।

आ० ॥ ॐ नमः परमात्मने पुराणपुरुषोत्तमाय ॥
अगुणाय गुणाढ्याय स्वात्मनेऽनन्तरूपिणे ।
शुद्धाय स्वप्रकाशाय श्रीरामगुनये नमः ॥ १ ॥
निर्गुणस्याप्रमेयस्य शुद्धस्याप्यमलात्मनः ।
कथं सर्गादिकर्तृत्वं ब्रह्मणोऽप्युपपद्यते ॥ २ ॥

प०—इति मुकुंदमुनिना वेदांतविवेकविरचितं श्रीरामचंद्रनाथप्रसादेन माध्यंदिनीशाखायां परमार्थबोधपूर्वकांडं समाप्तम् ॥

No 661.

अलंकारमञ्जरी—निर्मलः ।

आ०—कपोललंबिरोलंबविंबकोलाहलाकुलम् ।
अंबालंबानुरागाध्यालंबि लंबोदराननम् ॥ १ ॥
शानुभिष्पंस्यलंकारानल्पेन श्रयणेन ये ।
कुर्वंतु कर्णयोरर्थैः सर्गालंकारमञ्जरीम् ॥ २ ॥

प०—अर्थालंकारजातं हि मुख्यमेतावदेव हि ।
अन्ये येकन्विरा: सर्वे विज्ञेयाः किनु तद्गताः ॥ ४३ ॥
कादयो यल्लभट्टस्य पुत्रेण निरमाप्यसौ ।
निर्मिता त्रिम्म[निर्म]लाख्येन स्याल्कारमंजरी ॥ ४४ ॥
॥ इत्यर्थालंकारमंजरी समाप्ता ॥

## No. 676.

### किरातकाव्यं सटीकम्-मू॰भारविः,टी॰मल्लादयः।

टी॰आ॰—नत्वा परं ज्योतिः शिवं गणेशं
वाणीं भवानीं च गुर्वङ्घ्रिपद्मम्।
आशापुरां स्वां कुलदेवतां च
मिल्लाख्यकाव्यस्य वृत्तिं रचिष्ये ॥ १ ॥
श्रीवच्छ[त्स]लः पुष्करवंशवर्यो
ज्योतिर्विदां सूनुः द्विजाग्रगण्यभूत् ॥
जयरामनामा तत्सूनुरासी-
त्तर्कादिविद्याकुशलोऽतिविद्वान् ॥ २ ॥
तदात्मजो राजसभासु मान्यः
पुराणविद्याविदक्षः शुकाह्वः।
कृतेय सुज्ञातनुजेन तस्य
मल्लाह्वयेनैव स्वबोधनाय ॥ ३ ॥
वृत्तयः प्रचुराः संति अस्यामे भारविकृतेः।
तथापि तन्यतेऽस्माभिर्नूतना बालबोधिनी ॥ ४ ॥
घंटापथमतं गृह्य स्वात्मबुद्ध्यनुसारतः।
श्रीमनोहरजित्तस्य गुरोः पुनरनुज्ञया ॥ ५ ॥
छंदसो लक्षणं नोक्तमलंकारस्य चात्र वै।
शुद्धार्थप्रकाशिनी चेयं ज्ञातव्या विबुधोत्तमैः ॥ ६ ॥

घ॰—इति श्रीकिरातार्जुनीये महाकाव्ये लक्ष्म्यंके श्रीभारविकृतौ तस्य व्याख्यायां बालबोधिनीसमाख्यायां अर्जुनसंवरप्रदानो नामाष्टादशः सर्गः समाप्तिमगाणीत् ॥

No. 698.

चिमनीचरितम्—नीलकण्ठः ।

आ०—आसीदासी[दि]र्वचनविषयः पश्यतामामनाव्वं [आननाब्जं]
सोदर्यो[सौंदर्यां]तःकरणमवनीकौतुकं काव्यतत्त्वम् ।
स्फूर्तेर्मूर्त्तिर्मदनमहिमा भारतीभागधेयं
क्रीडास्थानं रसिकमनसां श्रीदयादेवशर्मा ॥ १ ॥
चेतोवृंदान्यलहविरदीखानसीमंतिनीनां
यस्मिन्नमी शलभकुलवद्रेजिरे झंपपातान् ।
बिभ्राणो यः किमपि ललितं लोचनालिप्रमोजः
स्त्रीणामासीदयनिवलये मोहनो मोहिनीनाम् ॥ २ ॥
सोऽयं दैवादलहविरदीखाननामानमेत्य
म्लेच्छाधीशं प्रकटितगुणः स्त्रीचकारात्तवृत्तिम् ।
तत्राप्येषः स्मरसहचरे वर्त्तमानो वयस्य-
प्युत्सुको[उल्लिसक्तां]तःपुरमृगदृशां पाठनस्याधिकारी ॥३॥
का[का]तो विमः क्व च परिचयोंतःपुरस्त्रीषु योयं
नीरूपाणां गलितवयसां युक्त उक्तोऽभियुक्तैः ।
इत्यज्ञानादपरिगणयन्म्लेच्छराजोऽन्वजाना-
देतदर्थे पवितुमनिशं मानिकामां नताङ्गी(म्) ॥ ४ ॥

च०—रस एव स ईश्वरः श्रुता-
विति निर्णीतमतोऽभिधीयते ।
निमनीचरिते रसाश्रयं
वचनं चेभम[चेतन]मभमः भ्रमः ॥ १०२ ॥
रिक्तीकृते निजतया भवभूतिमुख्यै-
र्भिक्षाटनं कृतवता[तः] पुनरुञ्छवृत्त्या ।

क्षेत्रे यदत्र खननेन ममार्थलाभो
य कोऽप्यभूदिह महेशकृपैव हेतु ॥ १०३ ॥
शुक्लजनार्दनपुत्रो वच्छा[त्सा]रार्यस्य दौहित्र ।
पवितालङ्कृतशास्त्रो भर्तृश्रीमडनच्छात्र ॥ १०४ ॥
हीराभिधानपातिव्रतमहसि प्राप्तनिजन्मना[ निजजन्मा ] ।
कविनीलकण्ठशर्मा निरमाच्चिमनीचरित्रमिदम् ॥ १०५ ॥
महिस्मुनीद्रदु [महीमुनीद्र] मितेऽब्देऽतिक्रान्ते विक्रमादित्यात् ।
शिवरात्रौ शिवपदयोर्निजकृतिराधायि नीलकण्ठेन ॥१०६॥
इति श्रीनीलकण्ठकविकल्पित चिमनीचरित समाप्तम् ॥

## No 711

नलोदयकाव्य सटीकम्—मू० रविदेव ।

टी० प्रज्ञाकरमिश्र ।

टी०आ०—कङ्कणफणिराजमणिं दीपधिया वदनमारुतैरसकृत् ।
निर्वापयति कुमारे सगिरिसुतो जयति सस्मित शभु ॥१
नलोदयस्य सहसा दुरूहस्य सुबोधिनीम ।
क्रियमाणस्य मे कुर्वन्नूपोऽस्तु शरण शिव ॥ २ ॥
तत्रभवान कालिदास प्रारिप्सितग्रथसमाप्तिप्रतिबधकविघ्नविघाताय
श्रीकृष्णस्मरणरूपमगलमादौ निबध्नाति । हृदयेति ॥
टी०च०—श्रीमिश्रानदकस्त्वासीन्महोपाध्यायलक्षित ।
पुण्यग्रामसभाजेता यद्वा वाणीमय सुधी ॥ १ ॥
वेदेनेव विधि कवि नयरतैस्तर्केण वाग्मपति
वेदान्तेन शिव मनुस्मतिगणैर्ज्योतिश्रयैर्भास्करम् ।
व्याकृत्येन फणाधर क्षितिधर नागाधिप छदसा
धर्मो यस्य विजितुमर्हति पर साख्येन चार्वाकपम् ॥२॥

तत्सूनुः सुकृती क्षितीश्वरकृपापात्रः सुहृत्पालको
नानाशास्त्ररतो महापदयुतोपाध्यायसंज्ञान्वितः ।
सत्तर्कायतकाननोद्यतचलद्वादींद्रदंतावल-
श्रेणीमर्दनचातुरीचणहरिर्विद्याकरो मैथिलः ॥ ३ ॥
तस्याग्रजोऽभूद्विबुधाग्रगंता प्रभाकरः सज्जनतापहर्ता ।
गुणालयश्रीशपदानुमंता शास्त्रेषु दक्षः कुधियां नियंता॥४॥
स्वल्पेन वयसा तेन कृता टीका सुबोधिनी ।
पूर्वाचार्यकृतीर्वीक्ष्य सुधियां पश्यतां मुदे ॥ ५ ॥
इति श्रीमैथिलप्रज्ञाकरमिश्रप्रणीतायां नलोदयटीकायां सुबोधिन्यां चतुर्थ उच्छ्वासः ॥ ४ ॥ समाप्तेयं सुबोधिनी टीका ॥

नलोदयकाव्यं सावचूरि–मू॰ रविदेवः ।

च॰–४४ ॥ इति नारायणसुतश्रीरविदेवविरचिते नलोदयकाव्ये चतुर्थोल्लासः समाप्तः ॥ ४ ॥

No. 715.

नेमिदूतकाव्यम्–विक्रमः ।

आ॰–प्राणित्राणप्रवणहृदयो बंधुवर्गं समग्रं
हित्वा भोगान्सह परिजनैरुग्रसेनात्मजां च ।
श्रीमान्नेमिर्विषयविमुखो मोक्षकामश्चकार
स्निग्धच्छायातरुषु वसतिं रामगिर्याश्रमेषु ॥ १ ॥
च॰–सद्भूतार्थं प्रवरकविना कालिदासेन काव्या-
न्त्यं पादं सुपदरचितान्मेघदूताद्गृहीत्वा ॥ २ ॥
श्रीमन्नेमेश्चरितविशदं सांगणस्यांगजन्मा
चक्रे काव्यं बुधजनमनःप्रीतये विक्रमाख्यः ॥ १२६ ॥
इति मेघदूतांत्यपादविरचितं नेमिदूताभिधानं काव्यं समाप्तम् ॥

No. 716.

नैषधस्य टीका—लक्ष्मणः।

आ०—सर्गस्थित्युदितं सुवर्णघटितप्रासादलंकारिता-
मापन्न कमनीयवृत्तरचितश्लोक प्रकाशाकृतिम्।
कल्पोद्बोधकृदन्वयांचितपदं सद्वर्णनीयस्थिति
श्रीवल्मीकभुवः प्रबधमिव तं श्रीरामभद्रं भजे ॥ १ ॥
श्रीपङ्क्तिरथपादाब्जरोलबीकृतविग्रहम्।
पितरं रामकृष्णाख्यं नौमि विद्याविशारदम् ॥ २ ॥
स्पर्धामभिनिवेशादुमया प्राप्तामुमासमाख्यां ताम्।
द्युनदीनिर्मलचित्तां मातरमेकां सतीं सदा वंदे ॥ ३ ॥
आ पूर्वाचलमा च पश्चिमगिरेरुर्वीभृतां शेखर-
प्रोताचिह्नितप्रांतमद्भुतवपुः श्रीलक्ष्मणामाचितम्।
वंदे विष्णुपदाश्रयं दिनकर स्वभ्रातरं सर्वदा
सत्कर्मप्रतिपादनार्थमुदितं प्रक्षिप्तदोषागमम् ॥ ४ ॥
गणेशाय नमस्कृत्य पितृभ्याममजन्मने।
करोमि नैषधव्याख्यामन्यादृष्टपथानुगाम् ॥ ५ ॥
सति यद्यपि सद्व्याख्या बुधाना नैषधे शतम्।
तथाप्यमुष्या वैदग्धीं केचिद्विज्ञातुमीशते ॥ ६ ॥

सर्गः १.

No 725.

पद्यतरंगिणी—सटीका—व्रजनाथ.।

आ०टी०—गुरुचरणसरोजद्वद्वमाधाय चित्ते
किमपि तदनुकपालम्धबुद्धिप्रभावः।

इह सुललितभव्यान्योक्तिपद्यानि सम्यक्
परिकलनरहस्यान्यर्थतः सूचयामि ॥ १ ॥

अ° मू°—खद्योतो द्योतते तावद्यावन्नोदयते शशी ।
उदिते तु सहस्रांशौ न खद्योतो न चंद्रमाः ॥ १ ॥

च° मू°—धन्यः स ते विधाता धन्यो वंशः स यत्र जातोसि ।
जीवयसि मूर्छितमपि न जगत्प्राणदानेन ॥ १०२ ॥

इति पद्यतरंगिण्यां व्रजनाथकृतश्लोकसंग्रहे द्वादशस्तरंगः ॥१२॥

च° टी°—यस्तीक्ष्णांशुकुले बभूव विमले श्रीमान्धराधीश्वरः
पृथ्वीराज इति प्रभावमहितः प्रत्यर्थिजेता रणे ।
श्रीकूर्मान्वयभूषणं नरहरिप्रेमैकपात्रं श्रियो-
लीलासद्म गुणैकधाम सकलक्षोणीशचूडामणिः ॥१॥

तद्वंशे सततावदातचरितः प्रौढप्रतापानल-
ज्वालाजालविदीपितारिनिवहः सच्छास्त्रनिष्णातधीः ।
देवब्राह्मणपूजकोऽतियशसा कुर्वन्सितं भूतलं
जातः श्रीजयसिंह इत्यभिधया ख्यातो धराधीश्वरः ॥ २ ॥

के नाभवन्नृपतयो बत विक्रमाद्याः
केनाप्यकारि नहि तेषु तुरंगमेधः ।
अस्मिन्युगे निखिलभूपतिसार्वभौम-
स्तद्यज्ञकृद्विजयते जयसिंह एकः ॥ ३ ॥

पारीक्षितोऽपि विदधे हयमेधमुच्चै-
स्तत्रापि दृश्यमयमुच्चमपूर्व्योऽपि ।
राजाधिराजजयसिंहनृपश्चकार
निर्विघ्नमेनमधुना भगवत्प्रसादात् ॥ ४ ॥

योऽदाद्दनीपककुलेषु सुवर्णपूगा-
नंभःकणानिव नभःस्थितवारिवाहः ।

वेदोदितेन विधिना हयमेधमुच्चै-
श्चक्रे तथा क्रतुशतानि महाधनानि ॥ ५ ॥
आसन् पूर्वं मानसिंहाद्यो ये
भास्वद्वंश्याः क्षोणिपालाः कियतः ।
चक्रुर्भूमिं भूमिपालान्वशे ते
श्रौते मार्गे नैव निष्ठामवापुः ॥ ६ ॥
राजाधिराजो जयसिंह एव
तद्वंशजः प्राक्तनपुण्यपुंजात् ।
संभावितो दक्षिणदिग्द्विजेंद्रैः
श्रद्धालुरासीच्छ्रुतिधर्म एव ॥ ७ ॥
पपाठ वेदं विदधेऽग्निहोत्रं
चकार यज्ञान्विविधान्सदैव ।
धनं ददौ ब्राह्मणपुंगवेभ्यो
ग्रामान् गजांश्चापि तुरंगमांश्च ॥ ८ ॥
बभौ स तस्य क्रतुराट् तदानीं
महेंद्रसस्पर्धिसमृद्धिभाज ।
अत्रागतश्चैत्र[च]कुलः स दैवा-
त्स्वर्णाधिपार्थोऽथ भविष्यदेव ॥ ९ ॥
वेदव्यासतनुः पुराणमनने तर्कागमे गौतमो
वेदांतार्थविवेचने जिमिसुतः काव्येषु काव्योऽपरः ।
शेषो व्याकरणे कलासु कुशलो गर्गस्तथा ज्यौतिषे
नानाशास्त्रविचक्षणो जयहरिः क्षोणीशमुख्योऽभवत् ॥ १० ॥
तस्मादजायत गुणैकनिधिर्वरेण्यो
विद्यानिधिर्विनयवारिधिरुद्धतारिः ।

श्रीमाधवो लसदुमाधवमाधवाब्ज-
योनिष्वभेदमतिरद्भुतदानशक्तिः ॥ ११ ॥

काष्ठं कल्पतरुः सुमेरुरचलश्चिंतामणिः प्रस्तरः
कामं कामगवी पशुः सुरपतिर्वृद्धभवा गोत्रभित् ॥
चंद्रो हंत कलंककीलिततनुः क्षारान्वितः सागर-
स्तेनायं जगतीनिरुपमतमः श्रीमाधवः क्ष्माधवः ॥१२॥

यश्चोर्वीतलसार्वभौममुकुटालंकारहीरायितः
स्फूर्जद्दिग्वयशःसुधांशुविसरद्रोचिश्छटाभासुरः ।
मध्याह्नार्ककरप्रकर्षविजयिप्रोद्यत्प्रतापोदयो
दानोद्रेकतिरस्कृतामरतरुस्वर्धेनुचिंतामणिः ॥ १३ ॥

मूर्त्तो धर्म उदेयिवान्किमथवा निष्पारिजातोऽभव-
त्स्वर्गः किं सकलः कलानिधिरगात्कर्णोऽवतीर्णः किमु ।
पार्थोऽयं किमुपागतः पृथुरथो पृथ्वीवियोगातुरो
यं वीक्ष्येति निरंतरं कविमुखादवैति वाग्वीचयः ॥१४॥

युधिष्ठिरो भीमसेनस्तथैव यशसार्जुनः ।
नकुलातिक्रमी भाति सहदेवोऽच्युतो रणे ॥ १५ ॥

यं प्रोद्दंडविलेशयेशविलसद्दोर्दंडचंडीभव-
कोदंडं रणमूर्ध्नि खंडपरशोराक्रम्य भासं स्थितम् ।
आलोक्यालसलोचनाः सरभसं नृत्यंति देवांगनाः
कंपंते हरयश्चलंति गिरयस्त्रस्यंति सर्वे रयः[र्वैऽरयः] ॥ १६ ।

यत्कीर्त्तिवितानमथिडत[ मंडित ]नवब्रह्मांडभांडोदरे
यस्मिन्भूमिपतौ प्रशासति भुवं सौभाग्यभव्यायुषि ।
चांचल्यं चपलासु चंद्रवदनानेत्रांचले तीक्ष्णता
चंद्रे लक्ष्म करमहः परिणये लोकेषु नैवाभवत् ॥ १७ ॥

आवासो निखिलपरां रणभुवि त्रासः प्रतिक्ष्माभृता-
मुल्लासः प्रतिभाजुषामतिमहान्व्यासः सभासंपदाम् ।
विन्यासः सुजनाशिषां प्रतिलवं रासः कुरंगीदृशां
विश्वासः प्रणयात्मनां[प्रात्मनां] विजयते श्रीमाधवः क्ष्माधवः १८
कवीश्वराणाममृत[मय] पंडितानां प्रकाशयन्ती विमलांतराणि ।
देशेष्वगम्येष्वपि संचरंती विभाति सिद्धेव यदीयकीर्त्तिः ॥१९॥
भूमंडले यद्यशसा विलिप्ते काका अभूवन्बकतुल्यभासः ।
किं चापगेऽज्ञायत गंगनैरगकर्पूरकस्तूरिकयोर्विभेदः ॥ २० ॥
उष्णत्वमुच्चैर्वदता कवीनां यस्य प्रतापे मतिमोह एव ।
यतो दधत्कज्जलमद्रिदर्या वसन्नकंपं न जहाति शत्रुः ॥ २१ ॥
येनार्थिसार्थार्थितपूरणार्थमर्थं [र्थि] जलं चोभयमाददाने ।
सुवर्णशैलांबुनिधिस्वरूपनाशप्रसंगाद्ययतुः प्रकंपम् ॥ २२ ॥
शौर्ये पार्थ इवापरो वितरणे देवद्रुमो वाङ्मय-
व्यापारे सुरराड्गुरुर्वसुमतीरक्षासु विश्वंभरः ।
धर्मे धर्मसुतः कवित्वकलने काव्यः प्रसादे शिवः
सोयं कूर्मकुलैकभूषणमणिर्जीयाच्चिरं माधवः ॥ २३ ॥
यस्याच्छाच्छप्रविततयशोगीतबद्धप्रबंध-
प्रक्षिप्तांतःकरणविवशीभूतभास्वत्तनूनाम् ।
क्रीडंतीनां वनभुवि गले गौरसीमंतिनीनां
गुंजाहारः समजनि जवात्कोपि मुक्ताच्छहारः ॥ २४ ॥
शिरःकुसुमभूषणीकृतकलानिधिस्तारका-
च्छलात्कलितमौक्तिकाभरणभासुरा सर्वतः ।
विभाति वसुधापतेर्गगनमंदिरे चंद्रिका-
प्रपुष्पललोचना विमलकीर्त्तिसीमंतिनी ॥ २५ ॥

कुंताभिप्रोतदंताधिकबलनिहतद्वेषिदंतावलौघ-
श्चितासंतानसंतापितरिपुवनिताभाग्यसौभाग्यहंता ।
श्रीरंता यस्य नित्यं निवसति विपदंताय हृत्कर्णिकायां
सोऽनंताधीश्वरोऽयं भवतु सुचिरं माधवः क्ष्माधवेशः ॥ २६ ॥
अस्मिन्भूवलये चिरस्य कति नो जाता धराधीश्वरा
येषां कीर्त्तिभरैरभूद्धवलितं भूमीतलं सर्वतः ।
यत्काचाभरणानि पंडितवधूस्तेषु [धूर्त्तेषु] मुक्ताफलं-
स्येतद्दानविधानकीर्त्तिरतुला यत्रैव दृष्टाद्भुता ॥ २७ ॥
यत्प्रतापोष्णकिरणप्रतप्तो विद्विषां गणः ।
शिशिरीकर्त्तुमात्मानमाश्रितः शिशिराचलम् ॥ २८ ॥
कुंदाभः स्वच्छचंद्रादपि समधिकभा वैरिवृंदावमंता-
मंदानंदानुभावो निजजनहृदयांभोजवृंदावनश्रीः ।
नित्यं यथारविंदासन [श्चारविंदासन]भुवनगतो
वाद्यवंदारुगीतः [ वाद्यवृंदोरुगीतः ]
स्वच्छंदं यस्य लोके विलसति नितरामद्भुतः कीर्तिपूरः ॥ २९ ॥
देवेंद्रद्विरदंति निर्झरसरित्पूरंति कुंदंत्ययो
मातंगद्विरदंति चापचमरीवालंति फेनंति च ।
देवाधीशहयंति केतकलसत्पुष्पंति सर्पाधिपं-
त्यृक्षंत्यद्रिकुलेश्वरंति च सुधासारंति दुग्धंति च ॥ ३० ॥
कर्पूरंति हरंति मौक्तिकलसद्धारंति हीरंत्ययो
कैलासंति विसंति मुग्धदशनज्योत्स्नंति हंसंति च ।
क्षीरोदंति हिमंति चंद्रकिरणग्रामंति रामंत्यपि
श्रीमन्माधवभूमहेंद्रमुकुटालंकारकीर्तिच्छटाः ॥ ३१ ॥
कालिंदीसलिलंति दुर्धरतमःपुंजंति मेघंत्य[ मेघंत्य ]यो
नीलांभोजकुलंति गाढमहारत्नंति भृंगंति च ।

काकोलंति पिकंति कज्जलमहाशैलति दंतावलं-
त्येवं यस्य च विद्विषामपयशस्तोमः कलंकंति च ॥ ३२ ॥
दानं दातुमिहोद्यतेत्र सततं यस्मिन्धराधीश्वरे
स्वर्णाद्रिर्निजदेहदारणभयात्त्रस्तः परं कंपते ।
देवाः स्वस्वनिवासनाशचकिताः शक्रादयो बिभ्यति
प्राज्यानंदसमुद्रसांद्रहृदया हृष्यंति चक्राह्वयाः ॥ ३३ ॥
अनुरक्तः सुहृद्वर्गो द्विषतो मलिनीकृताः ।
सितीकृतं जगत्सर्वं यदीययशसा भृशम् ॥ ३४ ॥
पूरयन्नर्थिनामर्थान्विबुधः परिपालयन् ।
विद्विषः संहरन्सर्वांश्चिरं जीयात्स भूपतिः ॥ ३५ ॥
तत्तुष्ट्यै व्रजनाथेन रम्या पद्यतरंगिणी ।
निबद्धा शोधनीयेयं सद्भिः सारानुरागिभिः॥ ३६ ॥
जयंति के वा न मनोज्ञरूपा वाङ्मदाद्याः खलपक्षिभूपाः ।
क्षीरांबुनोः सारविवेचने तु पुरस्क्रियते किल राजहंसाः ॥३७॥
नंदाभ्रगजशीतांशु१८०९मितेऽब्दे मासि पौषके ।
एकादश्यां रविदिने ग्रंथः संपूर्णतामगात् ॥
इति पद्यतरंगिण्यां नृपवंशवर्णनम् ॥

No. 742.

. महिम्नः स्तोत्रस्य टीका—श्रीकृष्णनृपः ।

आ°—अत्र तावत्कश्चित्पुष्पदंतनामा श्रीमन्महादेवस्य गणः ईश्वरपूजानिमित्तं कस्मिंश्चिदधिष्ठाने आकाशमार्गेणागत्य उद्यानोपवनवाटिकायाः सर्वपुष्पाण्याहार्यांतरिक्षेणैवागच्छति । तदनु दिनानुदिनमेवं पुष्पाण्याददानस्य कापि पदपद्धतिः केनापि महता यत्नेनापि न दृश्यते । ततश्च कस्यापि महात्मनः उपदेशेन पुष्पवाटिकायां सर्वत्र आरामिकैः

शिवनिर्माल्यमाकीर्यत। ततोस्य शिवनिर्माल्योल्लंघनदोषेण पुष्पाण्यादाय गच्छतो गतेर्भंगः संजातः। ततश्चारामपालकैर्दृष्टो गृहीतो निबद्धश्च। मारणाय सजातराजवाक्ये तेन राजपुरुषानित्यूचे। यदहं राजवाक्यादवश्यं व्यापादनीयः परं यदि भवंतो मां संस्नाप्य ईश्वरदर्शनं कारापयत। ततोहमीश्वरं संस्तूय परलोकं साधयामीत्युक्ते तैश्च राजपुरुषैस्तदनुष्ठितम्। तेनापि कृतस्नाने(न) ईश्वरपुरतः स्तुतिरियं हरिहरयोरभेदेनाकारि। ततश्च स्तुत्यंते तेषां राजपुरुषाणां पश्यतामप्याकाशमार्गेण हरिहरसकाशं संप्राप्तश्चेति किंवदंती श्रूयते। ततःप्रभृति सर्वोपि लोक इमां स्तुतिं सादरं सविशेषां पठत्येव। महिम्न इति ॥

ए॰—इति श्रीकृष्णनृपविरचिता महिम्नः टीका समाप्ता ॥

N. 743.

मुकुंदमहिमस्तवः—पुरुषोत्तमप्रसादः।

आ॰—श्रीमुकुंदं जगद्योनिं गोपीकांतं रमापतिम्।
ब्रह्मेशानादिभिर्ध्येयं शास्त्रयोनिं नमाम्यहम् ॥ १ ॥
अनंततां श्रीभगवन्महिम्नो
यतः श्रुतिः प्राह ततो न कोपि।
कार्त्स्न्येन वेत्तुं वदितुं च शक्तो
मुकुंद तेऽहं नम एव कुर्वे ॥ २ ॥

ए॰—श्रीमन्मुकुंदमहिमस्तवमेतमर्थ्यं
यः कृष्णपादकमले यदि रागमिच्छन्।
नित्यं पठेत्प्रयतमानस आदरेण
स श्रीमुकुंदकरुणामृतभाजनं स्यात् ॥ १ ॥

इति श्रीमगद्वल्लभाचार्यनियमानंदसंतत्याभयेण श्रीपुरुषोत्तमप्रसादेन विरचितः श्रीमन्मुकुंदमहिमाख्यस्तवः समाप्तः।

N. 748.

मेघदूतटीका—श्रीवत्सव्यासः ।

आ०—उपास्महे गणेशं तं सर्वविघ्नोपशांतये ।
यस्य प्रसादात्प्राप्यंते महिमादिविभूतयः ॥ १ ॥
कश्चित्कांतेति ॥

प०—इति श्रीकालिदासकृतौ मेघदूतकाव्ये श्रीवत्सव्यासकृता शिशुहितैषिणी टीका समाप्ता ॥

N. 756.

रघुवंशटीका—उदयाकरपण्डितः ।

आ०—यस्य भृगावलिः कंठे वदनांभोजराजिते ।
भाति रुद्राक्षमालेव स वः पायाद्गणाधिपः ॥ १ ॥
कालिदासोक्तयः कुत्र व्याख्यातारो वयं क च ।
तदिदं मददीपेन नाट्यवेश्मप्रकाशनम् ॥ २ ॥
तथापि क्रियतेऽस्माभिः पंजिका रघुवर्णने ।
टीकाविरहखेदार्त्तसाधुसार्थप्रवर्त्तने ॥ ३ ॥...

इति श्रीरघुकाव्ये कालिदासकृतौ पंडितोदयाकरविरचितं रघुकाव्यस्य प्रथमसर्गस्य विवरणं समाप्तम् ॥ १ ॥...

अपूर्णा ।

No. 760.

रघुवंशार्थदीपिका—हरिदासमिश्रः ।

आ०—श्रीमन्मदनगोपालं नत्वा तत्त्वार्थदायकम् ।
सर्वविघ्नापहर्तारं दातारं सर्वसंपदाम् ॥ १ ॥
विष्णुदासतनूजेन हरिदासेन धीमता ।
विरच्यते यथाबुद्धि रघुकाव्यार्थदीपिका ॥ २ ॥

च°—इति श्रीमन्महोदारांत.करणमिश्रविष्णुदासात्मजहरिदासमिश्रकृतायां रघुकाव्यार्थप्रकाशिकायां दिलीपव्रतोपदेशो नाम प्रथमः सर्गः ॥ १ ॥

No. 764

रसप्रदीपः सटीकः—प्रभाकरः ।

आ°—स्वबिंबमंबाकुचकुंभबिंबे विलोकमानं प्रतिबिंबमानम् ।
प्रचंडशुंडां परितः क्षिपंतं हेरंबमालंबनमाश्रयामः ॥
कलयतु कल्याणचयं रघुकुलतिलकः कुलोपास्यः ।
यस्य प्रसादलेशात्कपिभिरकूपारलंघनं विहितम् ॥
ग्रंथांतराद्विशेषो यः स्यादस्मिन्नसौ तु गुणगृह्यैः ।
अवधार्यतां रसज्ञैरज्ञैरितरैर्नरैर्मम किम् ॥

इह तावत्काव्यस्यानेकप्रयोजकत्वेपि रससवेदनजन्यं सुखमेव मुख्यं प्रयोजनम् ॥

च°—विस्तरेण चेयं वृत्तिरस्माभिरलंकाररहस्ये प्रसाधितेत्युपरम्यत इति ॥

श्रीमत्पुरारिपुटभेदनवासपूतः
श्रीरामचंद्रपदसारसचंचरीकः ।
श्रीविश्वनाथविबुधप्रतिपन्नविद्यः
श्रीमान्प्रभाकर इम व्यतनोत्प्रबंधम् ॥ १ ॥

भवतु कृतिरियं विदेहपुत्री-
परिवृढपादपयोजयोर्मदीया ।
कठिनविपिनभूमिरेणुखंड-
क्षपणपटुः सरसामृतोर्मिधारः ॥ २ ॥

व्योमाकूपारभूमीशगणे(य)खरवत्सरे ।
एकोनविंशवर्षे वि[ण] प्रबंधोयं कृतो मया ॥
दोषापहारिरुचिरो विलोलरससंचितः कोपि ।
विलसतु रसप्रदीपो यावत्कल्पं जगद्धितये ॥

इति श्रीमदिंदुवृंदारकवृंदवंदनीयपादारविंदभूसुरपुरंदरगजमुहमशामहोपाध्यायभट्टमाधवतनुजनिप्रभाकरोचीते रसप्रदीपे व्यंजनानिरूपणो नाम तृतीयालोकः समाप्तः ॥ ॥

No. 784.

विदग्धमुखमण्डनं सटीकम्—मू० धर्मदासः। टी० दुर्गदासः।

टी०—आ०—विघ्नौघद्विपमर्मभेदनलसत्कंठीरवं मोल्लस-
द्विप्रेशांघ्रिसरोजयुग्ममरणं सौभाग्यसौरभ्यदम् ।
नक्षोभभ्रमणोत्सुकभ्रमरसद्वृंदोपगीतं मुहु-
र्वंदे युक्तिपरागराजितमतिप्राचुर्यकार्यन्वहम् ॥ १ ॥
नीरक्षीरविवेकिनः परममी हंसा जयंति क्षितौ[ता-]
याचामंति पयः पयः पुनिरिदं निंदंति नो निंदिताः ।
धिक् दुष्टान् परदोषदुष्टहृदयान् किंवाऽनया चिंतया
युक्तायुक्तविदस्त एव मम चेदालंबनं जामति ॥ २ ॥
कणादिशास्त्रार्थचणाः संति यद्यपि वादिनः ।
गुणं तथापि कवयो जानंति कविसत्कृते(:) ॥ ३ ॥
यो ऽर्थः कथितः प्रथितो गुरुभिः श्रीभट्टदेवचंद्राख्यैः ।
एतत्कवितं स्वशक्त्या विरचयितुं मे मनस्तमेवार्थम् ॥ ४ ॥
यद्यत्पदं स्थगयते स च धर्मदास-
स्तत्तन्न को(पि) कलयेदिति दुर्गदासः ।

श्रीवासुदेवतनयो विनयो तनोति
मुग्धां विदग्धमुखमंडनमव्यटीकाम् ॥ ९ ॥

मंथकृद्ग्रंयादाविह शिष्टाचारपालनार्थं प्रवचनं जानन्नेव वस्तु काव्यमुखं प्रस्तौति ॥ सूत्रं ॥ सिद्धौपधानि भव–

च॰–७७ इति च्युतदत्ताक्षरा जातिः ॥

इति दुर्गकाविकृतायां विदग्धमुखमंडनस्य टीकायाम् ।
वर्गोऽजनिष्ट चतुर्थः क्लिष्टपरिच्छेदवान् परिच्छेदः ॥ १ ॥
समाप्तेयं विदग्धमुखमंडनटीका ॥

No. 815.

साहित्यरत्नाकरः–धर्मसुधीः ।

आ॰–आलिंग्य गाढमुदरं पितुरर्धजाने-
त्सुत्संगवर्त्यवतु बालगजाननो वः ।
यत्कुंभयोर्गिरिसुताकुचपार्श्वभाजोः
स्तन्यं पिपासति गुहस्त्रिभिराननाब्जैः ॥ १ ॥
श्रेयो मे विदधातु शारदशशिश्रीभासुरा भासुरा-
हारासारनिरासकारिमधुरव्याहारिणी हारिणी ।
मुक्ताभूषणपोषणस्मितलवश्रीः साधुना साधुना
(ला)वण्येन निजेन निर्मितवती रंभारती भारती ॥ २ ॥
नमस्तमःकर्दमदुर्दमांबुधिप्रणष्टचेष्टाखिलजंतुसंततिम् ।
प्रसार्यमाणैः पटुदीधैरश्मिभिर्जगत्त्रयीमुद्धरते विवस्वते॥३॥
लक्ष्मीं वक्षसि तारहारवलये तस्याः प्रियं सोदरं
बिभ्रच्छुभ्रमणिं परं च नयने नाभौ च भद्रासनम् ।
ऊरुभ्रूगलनाभिरोमलतिकामिश्राणि पंचायुधा-
न्याश्लिष्यन् करपंकजैरवतु नः कश्चिन्महाकामुकः ॥ ४ ॥

अनंतमत्यंतविशुद्धविमहं
महश्चिदानंदमय निरामयम् ।
अशेषवेदांतविचिंत्यवैभव
प्रशस्तमस्ति प्रविभास्वरं स्वतः ॥ ५ ॥
तदव्ययं ज्योतिरनाद्यविद्यया
वृत रजःसत्त्वतमोगुणाद्यया ।
प्रजापतिश्रीपतिपार्वतीपति-
प्रपचरूपाणि मुहुः प्रपद्यते ॥ ६ ॥
तदेकदात्मन्यखिलं चराचरं
निधाय नारायणनामकं महः ।
फणींद्रपर्यंकजले पयोनिधौ
चिराय रेमे निजयोगनिद्रया ॥ ७ ॥
ततोऽस्य नाभीसरसः सरोरुहं
समुद्ययौ यस्य समस्तमंबरम् ।
वितन्वदिंदीवरशावविभ्रम
दलांतरालेषु चिरं व्यलीयत ॥ ८ ॥
ततस्ततस्तामरसात्समुद्यत-
श्चतुर्मुखस्तद्रजसेव राजसः ।
जगत्सिसृक्षुर्जगदीशशासना-
त्समाधिसपन्नमना मनागभूत् ॥ ९ ॥
असमात्समाधिसविधान्मनसस्तदीयात्
पुत्रा मरीचिपुलहप्रमुखाः प्रसूताः ।
यत्पुत्रपौत्रतदपत्यपरपराभि-
रापूरितोभवदजांडकटाहगर्भः ॥ १० ॥

तेष्वंगिरोमुनिवरादुदयं प्रपेदे
भास्वानिवोदयगिरेर्हरितो मुनींद्रः ।
दोषानुषंगरहितश्च नभोगमार्ग-
भ्रांतो निराकृततमाः शुचियोगदीप्तः ॥ ११ ॥
गोत्रे च तस्य समभूदभिजातवंशो
वाराणसीत्युपपदेन भुवि प्रसिद्धः ।
तत्राभवन्बुधवरास्त्रिपुरारिसोम-
यज्वादयः शुभवपुःश्रुतिशीलवृत्ताः ॥ १२ ॥
देवान् हविर्भिरतिथीनशनैश्च शिष्या-
न्विद्योपदेशविधया परितोषयद्भिः ।
वाराणसीविहितनित्यनिवासदीक्षै-
र्यैः पंडितैर्भरतखंडममंडि पुण्यैः ॥ १३ ॥
सर्वज्ञतः शमितकामरुषो गिरीशा-
च्छ्रीपार्वतीप्रियतमात्त्रिपुरारिनाम्नः ।
तस्माद्बुधाद्बहुमुखोद्गतवाग्विभूति-
र्धर्मादियस्समुदभून्महितः कुमारः ॥ १४ ॥
नागांबिकां शुभगुणां प्रतिगृह्य कन्या-
मेकां गृहाश्रमनिवासकृते चिरं यः ।
अन्यप्रतिमल्लभयो निगमागमानां
सत्संप्रदायमकरोद्रचनायखंडम् ॥ १५ ॥
शंभोर्यदीयशतरुद्रकृताभिषेक-
तोयैर्ललाटगतजाप[ताप]हृदैः कपर्दे ।
गंगात्मना परिणतैर्द्विरेवसिक्ता
नूनं जटागतिलता शशिपुष्पशोभा ॥ १६ ॥

य सप्तवारविहितैर्वर(दमसा)दा-
(त्प्रसाद)मत्रसुपुरश्चरणैर्महेशात् ।
आसन्नमाद्दरमगान्निजवश्यजात-
विच्छेदशून्यविमलाखिलशास्त्रबोधम् ॥ १७ ॥
विधिवदनुष्ठितकर्मा धर्माख्यस्सुधीस्स्फुरद्धर्मा ।
जनयाबभूव तनयान्नारायणपर्वतेशरामाख्यान् ॥ १८ ॥
पदक्रमपदाक्षरक्रमजटाक्रमारोहणा-
वरोहविषमक्रमाक्रममुखावधानाधुनिम् [नाध्वनि] ।
परिक्रमणचक्रवर्त्यभिधयाष्टदिमूढया
चचार बहुश क्षितौ द्विजरथेन नारायण ॥ १९ ॥
जित्वा रामावधानिप्रमुखमुखमरुद्वेगवद्वेदचर्चा-
गोष्टचा नारायणार्य· सदसि बुधशतै श्लाघ्यमानावदान ।
सतुष्टाद्धर्मभूपादलभत शिबिका चामरच्छत्रपूर्वं
गर्वाखर्वावधानीश्वरसरभघटागण्डभेरुण्डचिह्नम् ॥ २० ॥

तस्यानुज पर्वतनाथसूरि-
रासीदशेषागमपारदृश्वा ।
ऐकात्म्यलीलायितमादिमानां
षड्दर्शनीजन्मकृता मुनीनाम् ॥ २१ ॥

एक कोऽपि सुदर्शन भ्रमकर पाणौ ललाटे दधौ
कश्चित्कामविघातक पदतले कश्चिच्छिवक्षोभकम् ।
नि शेषभ्रमभञ्जिका शिवकरी कामप्रदा पर्वता-
धीशार्य समदर्शयद्रसनया षड्दर्शनीमद्भुतम् ॥ २२ ॥
यास्मिन्त्वश्रुतिशुद्धिविष्णुभजनाभीष्टार्थविश्राणनै-
स्तस्मिन्विस्मयमावहत्यहिपतौ नित्यैकता धारिता ।

द्वित्वं पुष्पवतोः कृशानुषु गतं त्रित्वं चतुष्ट्वं चिरा-
दुत्सन्नं सनकादिषु प्रशमितं पंचत्वमिंद्रद्रुषु ॥ २३ ॥
येन स्वैरमभाणि पाणिनिमतं प्राणादि काणादवाग्-
गुंफे स्पष्टमनष्टि भट्टगुरुवागुट्टंकितं कुट्टिमे ।
निःशंकं निरटंकि शांकरमतं चाक्षोदि चाक्षांघ्रिवाग्-
धन्यधन्युदलास्यखंडि निखिला पाखंडखंडाटवी ॥ २४ ॥
यो वादेन जनार्दनाह्वयबुधं मध्येविपश्चित्सभं
जित्वाऽविंदत वादिकेसरिपदं प्रौढं तदीयं स्वयम् ।
मायाधादिभयंकराख्यबिरुदादस्थूर्जितादर्जितां
किं चोदंचयति स्म कीर्तिमतुलां प्रख्यापयन्वैष्णवम् ॥ २५ ॥
आटोपोद्भटनाट्यधूर्जटिजटाकोटीरकोटीनट-
द्गंगातुंगतरंगरिंगणभरप्रस्पर्धिवाग्वैभवः ।
सोय (स्व)प्रतिभाद्पनिकषग्रमोद्दामपट्टदर्शनी-
रत्नस्रङ्मयकंधरो यदनुजो रामाह्वयः पंडितः ॥ २६ ॥
तस्मात्पर्वतनाथसूरिजलधेः श्रीपद्ममांबाविय-
द्गंगासंगजुषो लसद्गुणमणेर्लब्धोदयश्चंद्रवत् ।
सोयं धर्मसुधीर्गिरां विलसितैः कर्तुं रसालंक्रिया-
सत्फूर्तिं समुदंचयेयमधुना साहित्यरत्नाकरम् ॥ २७ ॥

प०—इति श्रीमत्त्रिभुवनपवित्रहरितगोत्रावतंसवाराणसीवंशपद्माकरभानुना पदवाक्यप्रमाणपारावारपारीणश्रीमहोपाध्यायपर्वतनाथपंडितमलेश्वरसूर्यसूनुना श्रीपद्ममांबागर्भरत्नाकरपारिजातेन निर्मलाचारपूरितेन चतुर्दशविद्याख्यानसिद्धांतरहस्यनिशानवता श्रीधर्मसंख्यावता गिरान्ते श्रीमद्रघुकुलतिलकगुणगणमणिशाम्नि साहित्यरत्नाकरनामालंकारशास्त्रे रसनिरूपणं नाम दशमस्तरंगः ॥ १० ॥

आस्थामंदिरमिंदिराप्रणयिनो देवस्य रामात्मन-
स्त्वगत्तुङ्गतरङ्गरिंगणभरैरंगीकृताडंबरः ।
ताहृङ्निर्मलधर्मसूरिकविताकल्लोलिनीवेल्लनैः
पूर्णः कर्णमनोहरो विहरते साहित्यरत्नाकरः ॥ १ ॥
प्राचीनानुभवप्रवृद्धविहितग्रंथानुसंधायिना
सोयं साहसिकेन संप्रति मया नूत्नः प्रबंधः कृतः ।
कः स्तुष्येदमुनाधुनात्यसुलभो बोद्धा च निर्मत्सरः
सर्वज्ञो गतमत्सरोस्ति हि रमारामः स संतुष्यतु ॥ २ ॥
भो मातः कविते हितं मम वचः किंचित्समाकर्णय
श्रीमद्रामगुणस्तवामृतवतीं मर्त्यस्तुतिं मा कृथाः ।
कस्तूरीघनसारचंदनरसन्यासोत्सवास्वादवि-
त्को बीभीत्सवसासृपूयपिशितालेपाभिलाषी भवेत् ॥३॥
संजातो हरितान्वये महतपः [ऽमलतपाः] श्रीपर्वतेशः सुधीः
पण्णां दर्शनकारिणां सुमनसामैकात्म्यलीलाकृतिः ।
धर्माख्येन मनीषिणा विरचितस्तत्सूनुना तादृशा
सोयं यावदिलातलं विजयतां साहित्यरत्नाकरः ॥ ४ ॥

संपूर्णश्चायं ग्रंथः ॥

No. 838.

संगीतसारोद्धारः—कीकराजः ।

आ०—आनंदाब्धिमनेकजन्मसुकृतप्राप्यैकलभ्यं मुनि
प्रोद्यन्मानसराजहंसमनघं वैकुंठकंठीरवम् ।
ब्रह्मेंद्रादिसुरार्चितांघ्रियुगलं सद्भक्तिचिंतामणिं
नार्विदं कलवेणुवादनपरं दिव्यांगरागं भजे ॥ १ ॥

आसीदुद्यदुदारधीरचरितः श्रीमान्कपोलान्वये
साधु(ः) सज्जनसंज्ञकः कृतिजनप्रेद्दीयमानोदयः ।
उद्भूता विविधप्रदानजलधेरापूर्य भूमंडलं
प्राप्ता विष्णुपदं विभाति भुवने यत्कीर्तिभागीरथी ॥ २ ॥
तदात्मजनिरंजसा विबुधगीतकीर्त्तिः सदा
क्षितीश्वरगणार्चितो जगति कीकराजः कृती ।
परस्परजिगीपया वसति यत्र विद्याचय-
श्चतुर्भुजपरायणो जयति शारदानंदनः ॥ ३ ॥
यशोदयांकिततनुः सत्यासक्तमनाः सदा ।
सुदर्शनप्रियः कीकराजः कृष्णांशसंभवः ॥ ४ ॥
भरतकश्यपदत्तिलयाष्टिका-
र्जुनसमीरणतुंबुरुनारदाः ।
मुनिमतंगविशाखिलकंबलां
श्वतप[कंबलाश्वतर]कोहलराहलरावणाः ॥ ५ ॥
व्याख्यातारो भारतीये ये चान्ये लोल्लटादयः ।
अगाधबोधमंथेन तेषां मतपयोनिधिम् ॥ ६ ॥
सम्यगालोड्य कृतिना सज्जनानन्ददायिनी ।
कीकराजेन संगीतसारोद्धारो विधीयते ॥ ७ ॥

· च०—१७० इति श्रीश्रीमत्कपोलवंशावतंसमधुश्रीसज्जनात्मज-सकलविद्याविशारदमहनीयचरितमहायशश्शारदानंदकीकराजविरचिते संगीतसारोद्धारे नृत्यप्रकरणं सप्तमं समाप्तम् ॥

No. 869.

वृत्तरत्नाकरः सटीकः—मू०केदारभट्टः । टी०सुल्हणः ।

टी०भा०—श्रीकंठप्रभया युतं तनिरया प्रोद्भासितं गंगया
नानायत्नविराजितं शशिकलापीडोच्छ्र्यानंकृतम् ।

आर्यैर्पितमुपस्थिताखिलगणश्लक्ष्पूजितं सर्वदा
छंद शास्त्रमिनेश्वरस्य जयति त्रैलोक्यवंद्यं वपु ॥ १ ॥
कृष्णात्रेयस्य गोत्रे समजनि पुरा दाक्षिणात्यायणीयो
बेलादित्याभिधान· सुकविरभयद्भास्करस्तस्य सूनु· ।
तत्पुत्रः सुल्हणाख्यः सुललितपदा वृत्तरत्नाकरास्य·
छंदोवृत्ति स चक्रे सुकविहृदयानंदिनीनामधेयाम् ॥ २ ॥

च०—सद्वृत्तरत्नाकरनामधेयशास्त्रस्य वृत्तावधिकार एष· ।
प्रस्तारमुख्योत्र तु सुल्हणाख्यविनिर्मितायामजनिष्ट षष्ठ ॥१
प्रमादादौत्सुक्यात्क्वचिदनवबोधेन यदि वा
ममास्यां वृत्तौ ( यत् ) सहृदयजनाः कोमलमते· ।
अवद्य चेत्किंचिद्भवति भवतामंजलिरयं
प्रसाद कृत्वा तत्प्रगुणमतिभि शोध्यमखिलम् ॥ २ ॥
यावच्चद्रमसश्चलेन विलसद्दीपप्रदीपांचिते
रम्येऽनुक्षपमंतरिक्षफलके बध्नोत्सवं खेलति ।
तारासारदुरोदरेण निखिलं दिक्कामि(नीमडल)
जीयात्तावदियं मनोहरपदा वृत्तिः प्रसादात्सताम् ॥ ३ ॥

इति श्री०

No 887.

गणकमण्डनम्—नन्दिकेश्वरः ।

आ०—नत्वा दुर्गां गणेशं च श्रीमद्वेदागरायज· ।
नंदिकेश्वरसंज्ञोऽहं वक्ष्ये गणकमडनम् ॥ २ ॥

च०—श्रीमद्गुर्जरदेशेऽस्ति विप्रवृंदविभूषितम् ।
श्रीस्थलाख्यं पुरं रम्यं पुरुहूतपुरोपमम् ॥ १२ ॥

तत्राग्नीन्ध्रुतिशास्त्रज्ञो रत्नभट्टाह्वयो द्विजः ।
तज्जः श्रीतिगलाभट्टः सर्वविद्यामहोदधिः ॥ १३ ॥
तत्पुत्रोमालजित्संज्ञो वेदवेदांगपारगः ।
येन वेदांगरायेति प्राप्तं दिल्लीश्वरात्पदम् ॥ १४ ॥
पितृभक्तिरक्षणाजस्तत्तनुर्नंदिकेश्वरः ।
( सतां ) प्रीत्यै व्यधाद्ग्रयममुं गणकमंडनम् ॥ १५ ॥
ज्योतिर्निबंधमखिलं च तथा मुहूर्त-
चिंतामणिं गणकभूषणरत्नमाला[ ले ] ।
ज्योतिर्विदाभरणसज्जनवल्लभाख्यै [ ख्ये ]
दृष्ट्वा त्रिविक्रमशतादि मयेदमुक्तम् ॥ १६ ॥

इति श्रीगणकमंडने गणितप्रकरणांतमष्टमोऽध्यायः ॥

इति पद्मवाक्यप्रमाणज्ञभट्टश्रीरत्ना तत्पुत्रभट्टतिगला तस्मात्प्रजा(त) वेदांगरायस्तत्पुत्रेण नंदिकेश्वरेण बालविनोदनाय गणकमंडनसंज्ञो ग्रंथो विरचितः संपूर्णतां प्राप्तः ॥

No. 889.

तेषां ये गौडदेशीया राजपुत्रा यशस्विनः ।
अजमेरपदं तैस्तु गृहीत पुण्यभूमिजम् ॥ ३ ॥
गौडा नृपेंद्रा द्विजदेवभक्ता अरातिचक्राक्रमणेऽतिदक्षाः ।
लोकानुरूपाः सुतरां सुरूपास्तुरंगहेमांबरकुंजराढ्याः ॥ ४ ॥
तत्रासीच्छ्रुतिशास्त्रमार्गनिपुणो धीरोतिशूरामणी-
र्यैशोजित्ति नृपोत्तमः सकलजिद्वीर्येण भूभृत्पतिः ।
गांभीर्येण सरित्पतिर्धनपतिर्लक्ष्म्या गुणैः स्वर्पतिः
कांत्या रात्रिपतिर्धिया दृढगतिः सद्विद्यया वाक्पतिः ॥५॥
तत्सूनुर्द्विजदेवभक्तनिरतो भूपानुकंपान्वितो
योगार्जीति नृपो वभूस्सुमतिमान् योगींद्रसेवापरः ।
शूरः साहसिको रणांगणरतो दानेतिदक्षः सदा
नूनं सर्वजनप्रियोऽतिचतुरः सौजन्यरत्नाकरः ॥ ६ ॥
तस्यात्मजो धर्मरतोतिवीरो
गोपालदासो नृपतेर्बभूव ।
दील्लीश्वरार्चेन च नामधेयं
माधातृराजेंद्र इति प्रलब्धम् ॥ ७ ॥
सोयं पंडितमंडितोतिनिपुणो देवद्विजार्चारतः
स्वाचारेण मुनीश्वरो गुणनिधिः कारुण्यधाराधरः ।
वेदाज्ञापरिपालको दृढमतिर्माधातृनामा नृपो
येनेद प्रकटीकृतं हरिपद श्रीकीर्तिवल्ल्याः फलम् ॥ ८ ॥
शिवेन सार्धं हि सदा यथेश्वरी
शुभावहा सिंधुसुता च विष्णुना ।
तथैव मांधातृनृपेण सत्कुला
सदा कुमारीत्यभिधा पतिव्रता ॥ ९ ॥

सा पट्टराज्ञी खलु षट् तनूजान्
सौभाग्यसिंधून् सुषुवे च तस्मात् ।
स्वशक्तिसंपन्नमहाप्रभावान्
प्रायः पुमर्थानिव मूर्त्तिभाजः ॥ १० ॥

तत्रात्मजो ज्येष्ठतमोऽतिशूरो
दाक्षिण्यसिंधुर्गुरुदेवभक्तः ।
अखर्वगर्वः परगर्वहंता
विष्णुप्रियोऽभूद्बलिरामनामा ॥ ११ ॥

तस्माल्लघुः सत्यपरः सहिष्णुः
पदाभिषिक्तो नृपतिर्वदान्यः ।
राजात्मजश्रीरमणीसुखाढ्यः
स्याद्राजते विठ्ठलदासभूपः ॥ १२ ॥

द्विजहरिहरभक्तो युद्धकार्यैतिशक्तो
धनगजहययुक्तो विठ्ठलेशाल्लघुर्यः ।
ननु गिरिधरदासो भूमिपः सत्यवक्ता
परिजनसुखतुष्टः शोभते चातिहृष्टः ॥ १३ ॥

वैरिवर्गविजयस्ततो लघुः
ख्यातिमान् विजयरामसंज्ञिकः ।
वंदिवृंदधनदो विराजते
संकटेपि न च खेदमेत्यसौ ॥ १४ ॥

सत्कर्मधर्मनिरतोऽनितरां प्रवीण-
स्तस्माल्लघुः सकलसौख्ययुतो वदान्यः ।
सत्यप्रियः स च मनोहरदासभूपः
संशोभते सकलविखनु धर्मरूपः ॥ १५ ॥

तस्माद्गरीयान् द्विजदेवभक्त.
प्रद्युम्नसंज्ञो नृपति॰ सुरूपः ।
सौख्यान्वितः सर्वजनप्रियोऽसौ
स्याद्राजमानेन विराजमान॰ ॥ १६ ॥

श्रीमन्मांधातृभूपात्सकलगुणयुताश्चान्यदारोद्भवा ये
पुत्रास्तेषां मुकुंदो गुरुरतिनिपुण श्रीमुरारिस्ततोऽन्य॰ ।
स्तदन्यो[तस्मादन्यो]विहारी धनजनसहितो रामसिंहस्ततः स्या-
न्नून श्रीभावसिंहस्तदनु दृढतरो विष्णुसेनापरश्च ॥ १७ ॥

देवर्षिभक्तो ह्य[र]गञ्जेडरामो
भीष्मस्ततो भीष्मपराक्रमः सः ।
श्रीवीरभद्रोऽतितरां हि वीर-
श्चाष्टौ सुताश्चेत्र मतिप्रगल्भाः ॥ १८ ॥

शूरोऽतिधीरः सुतरां वदान्यो
धर्मप्रिय. श्रीबलिरामसूनु॰ ।
श्रीमद्रमोमाचरणेषु रक्तो
जीयात्सदासौ शिवरामनामा ॥ १९ ॥

जातः श्रीविट्ठलेंद्रो नरपतिविदितश्चानिरुद्धाभिधानः
शूरो येनातिवीर्यं स्वभुजबलवशात्सनिरुद्ध रिपूणाम् ।
तद्वचान्योऽर्जुनाख्यो विजितरतिपतिर्देहकान्त्यातिधीरो
दाने. श्रीकर्णतुल्योऽर्जुनसमबलवान्निर्मलः स्याद्यशोभि ॥२०॥

सुकृतकृत्परतापहरो लघु-
र्हरियशाख्य इति प्रबलस्तत. ।
तदनु धीरतरो ननु भीमजि-
त्सुजनपूजनशुद्धतनु सदा ॥ २१ ॥

जातः शिवप्रसादेन श्रीमद्गिरिधरेश्वरात् ।
धर्मकर्मान्वितः शूरः पुत्रो हरिजनाह्वयः ॥ २२ ॥
श्रीमन्मुकुंदजो भाति ज्यायानुदयभानुकः ।
कनिष्ठो हरिभानुश्च कुलोद्योतकरौ च तौ ॥ २३ ॥

अन्येपि मांधातृनृपस्य वंशे
पुत्राः प्रपौत्रा बहुशश्च शूराः ।
धर्मप्रियाः संति चिरायुषस्ते
भूयासुरित्थं खलु भाविनश्च ॥ २४ ॥

यद्दोर्दंडयुक्तोऽरिकुलगजघटाकुंभभित्खड्गभागः
पीत्वा रक्तं समंताद्वमति बहुतरं कीर्तिकर्पूरमेव ।
तस्य श्रीगौडभूपप्रबलगिरिधरस्याज्ञया चारु कुर्वे
मथ सत्संहिताभिः कलितगिरिधरानंदनामानमिदम् ॥ २५ ॥

इति श्री० श्रीमद्गिरिधरानंदे नानामुनिमतान्विते ।
कुलवर्णनसंज्ञोयमध्यायः प्रथमोभवत् ॥ १ ॥

च०—७१ ॥ इति संक्षेपेण श्रीजातकम् ॥

आसीद्गुर्जरदेशमंडलमणिः श्रीवत्सगोत्रोद्भवः
श्रौतस्मार्तविचारसारचतुरस्त्वौदीच्यचूडामणिः ।
वेदाताखिलशास्त्रवासरमणिः श्रीश्रीस्थलाख्ये पुरे
रत्नाभट्ट इति प्रसिद्धमहिमा सद्धर्मरत्नामणिः ॥ ७२ ॥

तत्तनुः कविताल्तासुरतरुः साहित्यवारांनिधि-
र्मीमांसाप्रखरार्थपंकजवने भासांनिधिः प्रोद्गतः ।
भट्ट श्रीतिगलाभिधो गुणनिधिः श्रीयज्ञविद्यायुतः
स्वच्छाचारकुमुद्वनीतकिरणः प्रानां विधाने विधिः ॥ ७३ ॥

तत्पुत्रः क्षत्रवंशाखिलनृपनिवहाभ्यर्चितः स्वच्छपादो
नाम श्रीमालजीति स्फुरदखिलगुण भट्टवार्या प्रवर्या- ।

य दिल्लीनायकोऽयं व्यरचत विबुधोद्दामवेदांगरायं
सोय गौडेंद्रभूपप्रवरगिरिधरस्याश्रयामुं चकार ॥ ७४ ॥
वृद्धा ये लघवो हि यत्र निपुणास्तान्याचिम नत्वादरात्
क्षन्तव्य मम तैर्मया यदधुना न्यूनाधिकं कीर्त्तितम् ।
नानानन्दभरैः सुकाव्यकुशलैः सुज्ञैर्गुणज्ञैर्धिया
यत्किंचिद्भ्रमतस्तथात्र पतितं शोध्यं महद्भिस्तु तत् ॥ ७५ ॥
इति॰ श्रीमद्गिरिधरानन्दे नानाशुनिमित्तान्विते ।
जातकाद्योयमध्यायो मथोऽपि पूर्णतां गतः ॥

No. 917.

तजिककौस्तुभ —बालकृष्णः ।

आ॰—ध्यात्वा तत्पदपद्ममदनिभं विन्ध्याद्रिसंस्थ महो
यत्रासीत्सकलागमार्थकलनः श्रीरामजित्पण्डितः ।
तद्वंशोद्भवभट्टयादवसुतः श्रीबालकृष्णाभिधः
कुर्वे ताजिककौस्तुभं सुललितं विद्वद्वृदाभूषणम् ॥ १ ॥
सत्ये विधिः शास्त्रमधात्र(वे) मुधा
त्रेतायुगे यन्मुनिबादरायणः ।
यद्वापरे गर्गकृतं यथाऽभव-
त्तिष्ये तथा ताजिकशास्त्रजं फलम् ॥ २ ॥
च॰—या ताप्युत्तरतीरसश्रयवती ख्याता प्रकाशा पुरी
यत्रासीदिह याज्ञवल्क्यतिलकः श्रीरामजित्पण्डितः ।
षट्शास्त्राध्ययनाधिराट् समभवन्नारायणस्तत्सुत-
स्तत्सूनुर्नयवेदवित्समभवद्यो रामकृष्णाभिधः ॥ १९ ॥
तदंगजो यादवभट्टनामा
नानागमार्थाकलितो बभूव ।

साहित्यपीयूषसुपोषितांग-
श्रितप्रकाशो जगति प्रसिद्धः ॥ १६ ॥

इह यादवभट्टजातजन्मा
कृतजवूसर आलयस्ततान ।
स हि ताजिककौस्तुभाभिधानं
कमनीयं भुवि बालकृष्णभट्टः ॥ १७ ॥

श्रीनारायणशंकरस्तवनके स्तोत्रं शिवायास्ततो
यंत्रोद्धारयुतं महागणपतेः स्तोत्रं त्रिवेण्यास्ततः ।
योगिन्यष्टदशाक्रमथ तरणेः संक्रांतिजो निर्णयः
पद्या यस्य विराजते कृतिरियं पाडित्यचिंतामणिः ॥ १८ ॥

एनं नरस्ताजिककौस्तुभं यः
कंठे विदध्यात्स मनीषिमान्यः ।
सर्वसहामंडलमंडनाय
भवेन्नरेशाश्मगजाश्ववित्तः ॥ १९ ॥

नात्यर्थ्यते चंद्रिकायां चकोरा-
श्चंद्रेणायो कल्पपुष्पैर्न भृंगाः ।
तद्वस्त्यादस्मिन्गुणोत्कर्षलेशः
कश्चिन्नूनं पंडिताः संतु सक्ताः ॥ २० ॥

यादृशो मम मतेः परिपाक-
स्तन्निदानवशतोऽयमकारि ।
शोधनं त्विह बुधा यदशुद्धं
प्रार्थनां सफलयंतु ममेनाम् ॥ २१ ॥

इति श्रीमद्भट्टयादवात्मजबालकृष्णभट्टविरचितस्ताजिककौस्तुभः समाप्तिमगमत् ॥

No. 939.

प्रश्नरत्नम्—नन्दराममिश्रः ।

आ°—यमक्षरं ब्रह्म वदंति विज्ञा
सिद्धास्तुरीयं यमकर्तृ सांख्याः ।
तं सत्यमानंदनिधिं स्मरामि
श्रीनंदसूनुं श्रुतिभिर्विमृग्यम् ॥ १ ॥
ज्योतिःशास्त्रे पंच शाखाप्रतानाः
सत्यस्तेषां यश्चमत्कारकारी ।
श्रीरुद्रोक्तः केरलिस्त तु सम्यक्
जानातीशस्तत्प्रसादाज्जनोऽन्यः ॥ २ ॥
ज्ञात्वा किंचित्तत्र कुर्वे प्रबंधं
श्रीगोपालप्रेरणात्प्रश्नरत्नम् ।
स्वर्णैर्वृत्तैर्भातु कंठे बुधानां
नित्यं भूमीपालविद्वत्सभासु ॥ ३ ॥
यद्यपि बहुप्रबंधाः शुक्लपटैः पंडितंमन्यैः ।
रचितास्ते न हि रम्या अतो मयाय समासतः क्रियते ॥ ४ ॥
श्रीमच्छिवेनोक्तमिदं रहस्यं तत्त्वं परं ये श्रुतितत्त्वहीनाः ।
बौद्धादयो वा यवनादयो वा तेभ्यो न दद्याद्यदि धर्मकामः ॥५॥
च°—सिद्धाष्टचन्द्रवर्षेऽश्वियुजः सितपक्षसप्तमगम् ।
पूर्त्तिमगाद्ग्रंथोऽयं पूगाब्धिद्विपमितैर्वृत्तैः ॥ ५४८ ॥
इति मिश्रनंदरामकृतं केरलिशास्त्रे प्रश्नरत्नं नाम समाप्तम् ।

No. 945.

प्रश्नसुधाकरः—लालमणिः ।

आ°—सिंदूरारक्तशुंडं सकलबुधजनानन्दकन्दे प्रचण्डे
माद्यन्मातङ्गवक्त्रं प्रकटकटलसद्दानपूराभिरामम् ।

कामं भृंगांगनाभिर्विरचितसरसोद्गीतसंशोभिगंडं
प्रत्यूहध्वांतधारातरुणिमतरणिं वक्रतुंडं नमामि ॥ १ ॥
ज्ञानप्रदीपादथ प्रश्नदीपात्संवित्प्रकाशादथ विष्णुतन्त्रात् ।
आदाय सारं मिहिरादिशास्त्राद्ब्रवीम्यहं प्रश्नसुधाकराख्यम् ॥ २ ॥

न॰—मज्जद्गीर्वाणकन्याकुचकलशतटापातसंचूर्णितांभाः
संभोगासक्तरंभाद्यमरपुरवधूनव्यजंभारिकर्त्री ।
प्रौढाहंभावभाजामपि सकलनृणां हंत दंभादिशत्रु-
च्छेदस्वच्छांबुपूरा विलसति भुवने सा त्रिवेणीकृपाणी ॥ २८ ॥
यत्संपर्कात्प्रयागः समजनि सहसा तीर्थराजाभिधानो
यस्मिन्पद्मासनोपि प्रतिदिनमकरोदश्वमेधीयदीक्षाम् ।
यस्मिन्न्यग्रोधवृक्षः प्रलयजलनिधिस्थायिशय्या मुरारे-
र्वेदो यस्यैव गाथां प्रथयति सहसा मुक्तितात्पर्यवक्त्रीम् ॥ २९ ॥
तस्मात्तीर्थाधिराजात्सकलवसुमतीस्वर्गसोपानमार्गा-
द्याम्ये भागेऽस्य विंध्याभिधधरणिधरादुत्तरस्मिन्प्रदेशे ।
आस्तेऽलर्काभिधानं नगरमतिलसत्सूर्यकन्यासमीर-
स्फारोन्मीलद्विलासं सकलवसुमतीमंडनीभूतलोकम् ॥ ३० ॥
ज्योतिर्विद्याविलासप्रणयपटुमतिर्भूमिदेवावतंस-
स्तत्राभूत्कोपि तत्त्वं समधिगतमयो येन वाग्देवतायाः ।
गंगारामाभिधानः सकलनृपसभामौलिमंदारवल्ली-
मालानिर्यन्मरंदव्यतिकररचितापूर्वपद्यादिपूजः ॥ ३१ ॥
क्षीराम्भोधेः कलावानिव विमलयशाः प्रादुरासीत्तदीयः
सूनुः सर्वानवद्याकृतिरचितजगद्रामनामा मनीषी ।
यस्य स्फारैश्चरित्रैरिदमजनि जगत्कौतुकोत्तानिताक्षं
यद्वाना पूर्णकामाः कथमिव कथयंत्वर्थिनः काकुवानम् ॥ ३२ ॥

कृष्णाराधनलब्धबुद्धिविभवप्रख्यातकीर्तिः सुधीः
श्रीमल्लालमणिर्बभूव तनयस्तेनापि कौतूहलात् ।
यत्प्राचां वचनप्रपंचरचनामालंब्य भव्योक्तिभिः
प्रश्नग्रंथविदां मुदे विरचितः श्रीप्रश्नसौधाकरः ॥ २३ ॥

इति श्रीज्योतिर्विज्जगद्रामात्मजज्योतिर्विल्लालमणिकृते प्रश्नसुधाकरे उत्पाताध्यायः संपूर्णः ।

No. 974.

यन्त्रचिन्तामणिः—चक्रधरः ।

आ°—नत्वा भवानीं प्रमथाधिनाथं रविं गुरोरंघ्रयरविंदयुग्मम् ।
यंत्रं च वक्ष्ये गणितानपेक्षं यथाशुबोधः समयादिकानाम् ॥१॥

च°—आसीदमजराजवंदितपदः श्रीवामनो विश्रुतो
ज्योतिःशास्त्रमहार्णवामृतकरः तत्सूक्तिरत्नाकरः ।
तत्सूनुः क्षितिपालमौलिविलसद्रत्नं महज्ञामणी-
श्चक्रे चक्रधरः कृती सविवृति सद्यंत्रचिंतामणिम् ॥ २६ ॥

इति यंत्रचिंतामणौ प्रकीर्णाधिकारश्चतुर्थः॥ ४ ॥

No. 975.

यन्त्रप्रकाशः सटीकः—मू० टी० रामचन्द्रः ।

आ°—शंभोः पदांभोजयुगं प्रणम्य
स्पष्टार्थतां गूढपदानि नेतुम् ।
यंत्रप्रकाशस्य निजाहितस्य
करोति टीकां कविरामचंद्रः ॥ १ ॥

विघ्नोपशमनाय विघ्नराजं प्रणमति ।
व्याकोशनाय मतिकैरवकोरकाणां
विघ्नांधकारपटलीदलनाय पुंसाम् ।

नानामनोरथचकोरकुलस्य पूर्ण

विभ्रज्जयत्यमृतरश्मिकलां गणेशः॥ १ ॥

स्याकोशनाय फुल्लत्वकरणाय कैरवं कुमुदं...

अथ स्वेष्टदेवते उमामहेशौ सकलवांछितार्थसिद्धये प्रणमति ।
संशाप्यानुः[शु] प्रणतमनुजामामितो[अनुजाभ्यामितो] माभितः श्री-
वाग्देवीभ्यां कनकरजताभासिनीभ्यामिनीव ।

स्वैरांगाभांकितमनलजाशर्वयोः पादपद्म-
द्वंद्वं वन्दे मिलितवपुषोऽर्धपर्कद्वाभकांत्योः ॥ २ ॥...

अथ सतो विज्ञापयन्नसतां चेहानधिकार एवेत्यधिक्षेपमाह ।

सद्भिः सृजद्भिरसतोपि च सत्त्वमस्म-
त्सप्रार्थनेन कृतिराद्रियतामियं नः ।
किं दुर्जनान्प्रति वदामि सुदुर्लभैव
स्वप्नेपि येषु सदसत्त्वविवेकवार्त्ता ॥ ७ ॥

अथ सदसद्विलक्षणानामज्ञानां शिक्षामाह ॥

अज्ञैर्ज्ञातु सद्रहस्यमप्संगाच्छीततां मनाक् ।
ज्ञात्वोरःसु निरात्सद्भिः संसृज्यं प्रियमिच्छुभिः ॥ ८ ॥

प्रियं हितमिच्छुभिरज्ञैः प्रयत्य रहस्यमन्यद्वा रहस्यं विज्ञातु सद्भिः संसृज्यं सद्भिः सह संसर्गः कार्यः । संसृज्यमिति 'ऋदुपधाच्चाकृपि चृतेरिति क्यप्' । किं कृत्वाप्संगाच्छीततां मनागुरःसु ज्ञात्वा जलसंसर्गाच्छैत्य भवतीत्येवं किंचित् हृदये विचार्य तद्दृष्टांतवशात्संसर्गात्सत्त्वं भविष्यतीति सत्संगे यत्नः कार्यः । "शीततां मनागिति पदांतस्येति परसवर्णाभावपक्षे रूपम् । 'उरःसु इति' वा शरीति विसर्जनीयपक्षे रूपम्" । तेनात्र श्लोकस्य प्रथमपादाद्याक्षरेण द्वितीयपादद्वितीयाक्षरेण तृतीयपादतृतीयाक्षरेण चतुर्थपादस्य चतुर्थाक्षरेण पुनः पंचमाक्षरेण पुनस्तृतीयपष्ठाक्षरेण पुनर्द्वितीयपादसप्तमाक्षरेण पुनराद्यपादाष्टमाक्षरेण आत्मनो विशिष्ट नामोक्तम् । पष्ठी च तस्येव कृतिरिति शेषाभिप्रायेण तस्य प्रयोपनिबद्ध रहस्य वा विज्ञातुमज्ञैः सद्भिः संसृज्यमिति सबंधाभिप्रायेणोक्ता ॥

च०—वत्सस्यास्ते महर्षेः प्रयततरकुले सर्ववि(द्यावि)दग्धः
सद्बुद्धिः शैवदासीर्बुधनलिनरविर्वीक्षितः सूर्यदासः ।
तत्सूनू रामचन्द्रो गुरुगुरुकृपयाध्यायमेत तु पष्ठ
वैशालाक्षेय आधाद्धहलकुतुककृच्चानुयत्नप्रकाशे ॥ ७२ ॥

सावित्री शिशुनैव यश्चिरमभूद्याता मया भक्तितः
काश्यां स्पर्शमदाच्च कश्चन मुरो यच्छ्रीभवान्याः पुरः ।
शैशवेऽपि न पर्यचाययदलं यद्दीक्षया श्रीगुरु-
स्तत्तद्विभवतो ममामलमतौ श्रीभारती भासते ॥ ७४ ॥
मीमांसाद्वयमूलया फणिपतिप्रोद्गीतभाष्यामृता-
साराभ्युक्षितपाणिनीयधरणौ साहित्यबीजोत्थया ।
सांख्यन्यायपुराणपक्षवितया श्रीरामधीर्धीवुधा [धीत्रियया]
वेदांगादिफलैः सदुक्तिकुसुमैः को वा न संतोष्यते ॥ ७५ ॥

इति श्रीमहेश्वराचार्यश्रीरामचन्द्रविरचितायां स्वविरचितयन्त्रप्रकाशटीकायां कुतूहलयन्त्रप्रकाशनो नाम षष्ठोऽध्यायः समाप्तः ॥

No 984.

राजविजय—रणहस्ती ।

आ॰—वरदपाशरदांकुशविस्फु-
रकरनतास्यसरोरुहभास्करः ।
दिशतु नः श्रियमुग्रदासन
शशिकलांकितमौलिरिभाननः ॥ १ ॥
यत्पादपंकजयुगप्रणतिप्रसादा-
त्सद्यस्तिरस्कृतबृहस्पतिवाग्विलासः ।
मूकानेऽपि चतुरा विकसंति वाचो
वन्दे गिरीशदयितां जगदम्बिकां ताम् ॥ २ ॥
बालं कुमार परिहृत्य येन
भानुं गुणानं च विलोक्य सद्यः ।
अगौ पुरामेकशरेण भिन्ना
वन्दे गुरुं सत्वरगीभरं तम् ॥ ३ ॥

No. 1026

हिल्लाजव्याख्या—रामेश्वरः ।

आ० रामो भैरवपद्युगं गुरुवरं तातं तथा श्रीपतिं
गोविंदाख्यगुरुं प्रणम्य कृतिनं दैवज्ञचूडामणिम् ।
योऽकार्षीदुरुसंहिताब्धितरणिं पीयूषधाराभिधां
चूडामण्यभिधां विचार्य कुरुते हिल्लाजटीकां कृती ॥ १ ॥
सृष्ट्यादौ कमलोद्भवेन गदितं सूर्यं प्रति प्रांशु त-
च्छापान्म्लेच्छगतोऽथ रोमकपुरे म्लेच्छेषु यद्दिष्टवान् ।
शास्त्रं ताजिककं ततस्तदभिध पश्चात्सुपद्येरिस
श्रीमद्रोमककेन तन्मतमभूत्सद्यत्यय तत्ततः ॥ २ ॥
खिंदाख्यः कृतवान्सुपद्यललितैर्हिल्लाजसंज्ञं शुभं
ज्ञात्वा रोमकजं पुरान्यपठित जन्माब्दपृच्छात्मकम् ।
तन्नष्टे त्वधुना तथापि च तदायुर्दायपद्यास्ततो
दुर्बोधात्सुजनस्य बोधविधये स्पष्टं तु कर्त्तुं सुधीः ॥ ३ ॥

ननु हिल्लाजस्य आयुर्दायाद्यर्थं प्रवृत्तिः स च जातकपद्धतिरेव सिद्धम् । एवं सति हिल्लाजस्याऽप्रवृत्तिविषयत्वात् । तत्र तद्विवरणकर्तुः सुतरां प्रवृत्तिर्लघीयसीतिचेन्न । जातकपद्धत्युक्तायुर्दायस्याऽघटकत्वात् । तथा च हिल्लाजभाष्ये ।

ताजकजातकजनित जन्मफलं कीर्त्तयेन्न शकजाते ।
तस्मात्पद्धतिमार्गे स्फुटं न घटते फल तेषाम् ॥ १ ॥
दृष्टिर्मैत्र वा दृग्बलवीर्यं पंचवर्गिकापूर्वम् ।
सर्वे दलीलसञ्ज्ञ होराशास्त्राद्विसवादी ॥ इति ।

पूर्वपद्यस्यायं भावः । यस्मात्पद्धतिमार्गजनितं फलं स्फुटं न घटते तस्माल्लोकानां शकजातेस्ताजकजातकजनित जन्मफलम् ।

कोर्थः। यवनव्यतिरिक्तोक्तजातकताजकफलमित्यर्थः । तं न कीर्त्त-येत् । तर्हि केनोक्त फलं कीर्त्तयेदित्यत्राह । दृष्टिरिति । दृष्ट्यादि सर्वमेतद्दलीलसंज्ञं यवनसंज्ञं यवनोक्तमित्यर्थः । दलील इति भापया यवनोक्तलक्षकम् । यद्वा । दलील इति हिल्लाजोपलक्षकम् । एतत् होराशास्त्रादिसंज्ञादि ।------पुण्यसहम तत्पती पर्वलमतत्पती क्रूरविशुद्ध्या द्रष्ट्याविल्यर्थः । अमुना प्रकारेणैषां चतुर्णां मध्ये यस्यैव संभवः तद्घाश्वं तद्धिल्लाजसंज्ञं भवतीत्यर्थः । हिल्लाजशब्देन शरीरमुच्यते । चतुर्णां मध्ये यदा एकस्यापि हिल्लाजसंभवो नास्ति तदा तज्जन्मस्थं अल्पजीवितं स्यादित्यर्थ.।------अत्रोदाहरणम् । चतुर्दशशतचतुःषष्टिवर्षाधिके शालिवाहनशके १४६४जाते कार्तिक शुद्ध षष्ठी शनौ सूर्योदयाद्गतघटी एकोनपचाशत् घटी ४९ नवपलानि ९ । श्रीमत्समस्तपृथ्वीमंडलाधिप अक्कबरसाहस्य जन्मकालः ।...वामनजातके दर्शितः । यथा । रसांगाष्टशरा पंच--------संज्ञातंत्रे दर्शिताः आद्याः कुजाद्या रवितोपि मध्यमाः...

इति श्रीक्षीरसागरोपनामकश्रीपतिभट्टांगजरामेश्वरविरचितायां हिल्लाजव्याख्यायां चूडामण्यभिधायामायुर्दायप्रकृतिः समाप्ता ॥ १ ॥

च°—इति श्रीरामेश्वरविरचितायां हिल्लाजव्याख्यायां चूमण्यभिधायां प्रश्नायुर्दायः समाप्तः ।

No. 1029.

## होरामकरन्दः—गुणाकरः ।

आ°—उदयशैलभुजगफणामणि-
दिवसभुरुहनूतनपल्लवः ।
दिशतु न. स गिरं महसां निधि-
र्बुसरसीसरसीरुहमुल्लसन् ॥१॥

जयति विबुधशंसन्मानसावासहंसी
वचनमयशरीरा भारती हारगौरा ।
तदनु च विजयंते सूर्यमुख्या ग्रहेंद्रा-
स्तदपि च पदपद्मद्वंद्वमस्मद्गुरूणाम् ॥२॥
यो बादरायणवशिष्ठपराशराद्यै-
र्होराविधिर्विरचितो विविधांस्तदर्थान् ।
विज्ञाय सम्यगधुना वयमप्यविज्ञा
यत्कुर्महे किमपि भोत्र गुणास्तदीयाः ॥३॥
जडात्मके मद्धृदयेंदुबिंबे संमूर्छिता मोहमहांधकारम् ।
निरस्य शश्वन्मुदमावहंत्यो जयंति रम्या मिहिरस्य गावः॥४॥
होरोत्पले राजमृगांकगोभिर्विकासिते सत्यमलाभिरत्र ।
पुष्पंधयस्येव ममानुगीतिरियं सतां श्रोतृसुखाय किं तु ॥५॥
स्वतातपादांबुजचंचरीको गुणाकरः संप्रतिमुच्चिनोति ।
इयं हि होरामकरंदमाद्यानवद्यहोरासुमनश्चयेभ्यः ॥ ६ ॥
च°—श्रीनारायणसंज्ञको द्विजवरो विद्यावधूवल्लभः
श्रौतो येन विधिः कलौ कृतयुगोत्कर्षे परे प्रापितः ।
ग्रामोऽवंतिविभूषणैकतिलकः खर्जूरनामाह्वय-
स्तस्मिन्सद्गुणकेलिभूसुर[भूषण]मभूत्कौंडिन्यगोत्रोद्भवः ॥१६॥
तस्मादभूदमलसद्गुणरत्नसिंधोः श्रीश्रीपतिर्गणककैरवशीतरश्मिः ।
गोचक्रवालममलं सुमनश्चकोरा यस्यानिशं श्रवणचंचुपुटैः पिबंति॥१७
श्रीब्रह्मपुत्रार्यभटोत्पलाद्यवराहलल्लेषु दिवं गतेषु ।
निराश्रयेयं समवेक्ष्य वाणी विलासवासं रचयांचकार ॥१८॥
दृष्ट्वा यद्यशसेंदुपादमहसा शुभ्रं त्रिलोकीतलं
ज्योत्स्नापानधिया भ्रमंति परितो मुग्धाश्चकोरांगनाः ।

तत्पुत्रेण गुणाकरेण गणकानंदेंदुना जातकं
श्रीहोरामकरंदसंज्ञमरचि ज्योतिर्विदां प्रीतये ॥ १९ ॥
यदज्ञानान्नोक्तं कुकृतमिह यद्वाल्पमतितो
विशोध्य तत्कर्तुं स्वयमपि यतंते सुमनसः ।
विनाशे दोषाणामभिलषति या प्राज्ञ [पद्मानि]सविता
न पर्जन्यः सम्यक् जनपदनिदाघक्षयकृते ॥ २० ॥

इति श्रीगुणाकरविरचिते होरामकरंदे जातके नष्टजातकनामैकत्रिंशोऽध्यायः समाप्तः ।

No. 1030

होरारत्नम्—बलभद्रः ।

आ°—होरापाथोनिधेः पारं दुःपारं तर्तुमिच्छत. ।
महागणपतेः शुंडावलंबाय प्रजायते ॥ १ ॥
अस्ति श्रीमत्कान्यकुब्जाभिधानं सद्विप्राणां संभवे यन्निदानम् ।
तत्रैवाभूच्छ्रीभरद्वाजवंशे श्रीमल्लालः कीर्त्तिविद्याविशालः॥२॥
अद्यात्मजोऽभूत्कृतिदेविदासो विचारमाकीर्त्तिसुखैकवासः ।
सत्पद्धतौ श्रीपतिनिर्मितायां व्यक्ते च टीकामकरोद्विचित्राम् ॥३॥
तस्मात्सधुर्ज्योतिषशास्त्रविज्ञः श्रीखेमकर्णः समभूद्विधिज्ञः ।
नारायणोऽभूच्च ततः कनिष्ठ सर्वाधिपोक्तो सुतरां पटिष्ठः ॥४॥
ततोऽभवन्मिश्रचतुर्भुजाख्यः सत्तर्कवेदांतविदग्रगण्यः । .
समस्तभूमीपतिलब्धमानः श्रीरामभक्तौ विहितैकतानः ॥ ५ ॥
ततोऽभवद्भूपसभास्वजेयः कृती च दामोदरनामधेयः ।
श्रीभास्करोक्तावकरोन्मनोज्ञां टीकामपूर्वां बुधवृंदयोग्याम्॥६॥
दामोदरस्य पुत्रौ जातौ बलभद्रहरिरामौ ।
बलभद्रेण कृतं प्राक् सवासन टिप्पणं च मकरंदे ॥ ७ ॥

तद्दिप्पण भास्करीये च बीजे कृतं जातके वर्षेरत्न त्वपूर्वम् ।
निबधं गुरोः पादपद्मप्रसादाद्यतो जातके संनिबंध करोमि ॥८॥
यद्यपि कृता निबधाः सुविस्तरा जातके पूर्वैः ।
विद्वन् ततो विशेषा मयोदिता बुद्धिपूर्वकं वीक्ष्य ॥ ९ ॥
नत्वा दामोदरं तातं गुरु श्रीरामसंज्ञकम् ।
होराबल विन्मुदे[वितनुते] बलभद्रः सतां मुदे ॥ १० ॥
च०—वशिष्ठगर्गादिमुनिप्रणीतान्वराहकल्याणकृतान्निरीक्ष्य ।
सज्जातकान् जन्मफलक्रमार्थं सुसंप्रदायाद्रचित मयेदम् ॥१॥
औदार्यगांभीर्यविराजमानः स्वतेजसा[रिपुह] ताभियान ।
बलान्वित सद्गुणताभिधान पृथ्वीपति साइयुताधिनाथ ॥२॥
तदतिकस्थेन कृत मयैतत्खचन्द्रसप्तेंदुमितेऽब्दकाले ।
मघौ चतुर्थ्यां सितपक्षजाया विमत्सराणां कृतिनां सुखाय॥३॥
इति श्रीमद्दैवज्ञवर्यपंडितदामोदरात्मजबलभद्रविरचिते होरारत्ने श्रीजातकाध्यायो दशम । समाप्तोऽयं ग्रंथः ॥

No 1115

## कौतुकरत्नावली ।

आ०—अथ कौतुकरत्नावली लिख्यते । पर्वतरत्नावली तच्चिकित्सा लिख्यते । सयोगादीत(र)द्विविध शौर्यरता राज्ञा व्यसननिरसनकौतुकावलोकनेनैव कालयापन कर्तव्यमित्युक्तवत । प्राप्तावसराणि कौतुकानि सक्षेपतो निरूप्यते । तान्येव कौतुकानि द्विविधानि । एके अर्थरूपाणि । अपरे शब्दरूपाणि । तत्र प्रथममर्थरूपाणि स्तंभनवशीकरणवाजीकरणकृत्रिमवस्तुकरणजनाद्दृश्यकरणवृक्षदोहदादिभेदान्यनेकप्रकाराणि । शब्दरूपाणि । द्वितीयानि तु शब्दालंकारकृतगद्यपद्योभयात्मककाव्यरूपाणि...

अपूर्णा ।

No. 1120.

गौतमीयतन्त्रम् ।

आ°—सिद्धाश्रमे वसन्धीमान्कदाचिद्गौतमो मुनिः ।
तपःस्वाध्यायनिरतो भक्तिमान्पुरुषोत्तमे ॥ १ ॥

अ°—अस्यालोकनतश्चित्ते कृष्णात्मा संप्रसीदति ॥ १११ ॥

इति गौतमीयतंत्रे सर्वतन्त्रोत्तमे द्वात्रिंशत्तमोऽध्यायः ॥३२॥

No. 1137.

मन्त्रचन्द्रिका—जनार्दनः ।

आ°—आरक्ताभं त्रिनेत्रं पृथुतरजठरं वेदहस्तान्दधानं
विभ्राणं मौलिदेशे हिमकरशकलं दानधारात्तकुंभम् ।
ब्रह्मेंद्राद्यैः समस्तैरमरपरिवृढैः सेवितं शुभ्रदंतं
भोगींद्राढ्यं प्रसन्नं सकलशुभकरं तं भजेऽहं गजास्यम् ॥ १ ॥
उदितदिवाकरदेहां पुरहरवामांगकृतगेहाम् ।
परिपूरितभक्तेहां सस्नेहां शैलजां वंदे ॥ २ ॥
पीयूषांशुकलां मनोज्ञमुकुटां शैवालतुल्यालकां
गलभीविजिताष्टमीशशधरां नीलारविंदेक्षणाम् ।
चापं बाणगुणांकुशान्मृदुतरैः संबिभ्रती बाहुभिः
त्र्यक्षां सुमनोरमामरुणभां वंदे गिरींद्रात्मजाम् ॥ ३ ॥
कलिंदीकलकूलकेलिकलनानंदाकुलैः संततं
संवीतं शिशुवृंदकैर्मुनिवरैर्गीतं गुणैकालयम् ।
लीला(नाशित)विश्वविश्वभयदाशेषासपानीककं
संसारैकमहाद्रुमस्य दहनं कंदं मुकुंदं भजे ॥ ४ ॥
श्रीश्वरंजितविश्वजनस्तनुभाविजितोत्तमनन्यगनः ।
इकृनपलानिनयेन वृतस्तनुतां मम शर्म मुकुंदहिनः ॥ ५ ॥

फुल्लंति वारिजगणा विहरंति कोकाः
कामं चरंति विहगाः सकलासु दिक्षु ।
शिष्याः पठंति च भवंति शुभानि लोके
यस्योदये तमहमाशु रविं नमामि ॥ ६ ॥
यः पंगुसारथिरथो रथमेकचक्र-
मारुह्य तत्र विनियोज्य च सप्त सप्तीन् ।
लोकत्रयेप्यटति चित्रचरित्रकारी
भानुः स भानुभिरहो मम पातु देहम् ॥ ७ ॥
यो योगिनामपि मनश्चपलीचकार
पुष्पेषुभिर्व्यथयति स्म यवीयसो यः ।
तं मंक्षु नेत्रशिखिना शमयांचकार
मारं हरं तमहमाशु नमामि भक्त्या ॥ ८ ॥
चलच्चरणताडितक्षितितलं सुपर्वापगो-
च्छलज्जलभृतांतरं भ्रमितभीमनेत्रत्रयम् ।
जटापटलभेदितोपरिचरांबुद धूर्जटे-
स्तनोतु पटुतांडवं मम नवं नव मंगलम् ॥ ९ ॥
आसीदागमशास्त्रकीरवसतेः सत्पंजरः सज्जन-
व्यूहानंदकरः कलानिधिकलाभालप्रियाकिंकरः ।
नानाशास्त्रविचारचारुकवितासंदोहविशाखिल-
प्राज्ञस्तोमपरिष्टुतो बुधवरःश्रीश्रीनिवासः कृती ॥ १० ॥
आसीदशेषनरपालविशालभाल-
जालप्रमार्जितमनोरमसत्पयोजः ।
सर्वागमांबुनिधिमथनमंदराद्रिः
श्रीश्रीनिवासतनयस्तु जगन्निवास. ॥ ११ ॥

तन्नंदनाः सुकृतिनः करुणार्द्रचित्ताः
शैलेंद्रजाचरणपंकजचंचरीकाः ।
ज्येष्ठः शिरोमणिरिति प्रथितः कनिष्ट-
स्तस्माज्जनार्दन इति ह्यनुचक्रपाणिः ॥ १२ ॥
जनार्दनाभिधस्तेषु यथामति कुतूहलात् ।
तांत्रिकात्यतत्रेऽधाय कुरुते मंत्रचंद्रिकाम् ॥ १३ ॥
मंत्राणि यानि ह शिवार्चनचंद्रिकायां
श्रीश्रीनिवासकृतिना प्रकटीकृतानि ।
सर्वाणि तानि मुनिचिंतनयुक्षडंग-
युक्तान्यविस्तरतयेह वदामि साधु ॥ १४ ॥
आदौ गणपतेर्मंत्राःशिवायास्तदनंतरम् ।
ततः कृष्णस्य सूर्यस्य शंभोश्चोक्ता यथाक्रमम् ॥१५ ॥
च°—इति मंत्रचंद्रिकायां द्वादशः प्रकाशः।
यावत्सूर्यश्च सोमश्च यावत्तिष्ठंति देवताः ।
तावदास्तां धरामध्ये रुचिरा मंत्रचन्द्रिका ॥

No. 1167.

अजितशान्तिजिनस्तवटीका—जिनप्रभसूरिः ।

च°—सद्विक्रमभूपतेः शरऋतुदर्चिःशशांकैर्मिते
पौषस्यासितपक्षभाजि शनिना युक्ते द्वितीयातिथौ ।
श्रीमाघश्रीजिनसिंहसूरिसुगुरोः पादाब्जपुष्पंधयः
पुर्यां दाशरथेर्जिनप्रभगुरुर्जेमन्य टीकामिमाम् ॥ १ ॥

No. 1169.

अध्यात्मबिंदुः सटीकः—मू°टी° हर्षवर्धनः ।

टी°आ°—अनंतविज्ञानविभूतिशाली
सत्प्रातिहार्याद्भुतभूतिमाली ।

तीर्थांतरीयानवबुद्धयोगा-

गमार्थदेशी जयताज्जिनेंद्रः ॥ १ ॥

अथातः शुद्धात्मानुभवरसिकानामनेककदागमार्थश्रवणकुदृष्टचुपासनसंस्तवनादिक्रियाभासप्रक्रियापर्याप्तात्मतत्त्वविप्रतिपत्तीनां भव्यसत्त्वानामुपकाराय शुद्धात्मस्वरूपप्रतिपादनपटिष्ठाध्यात्मबिंदुप्रथमद्वात्रिंशकाविवरणं स्पष्टमुपक्रम्यते । तस्य चेदमादिपद्यम् ।

मू० आ०—ब्रूमः किमध्यात्ममहत्त्वमुच्चै-

र्यस्मात्परं स्वं च विभज्य सम्यक् ।

समूलघातं विनिहत्य घानि

नाभेयभूः केवलमाससाद ॥ १ ॥

मू० च०—इत्येवं संप्रधार्य द्रुततरमखिलं भेदसंविद्धलेन

जीवाजीवप्रपंचं विदलति किल यो मोहराजानुवृत्तिम् ।

ज्ञानानंदस्वरूपे भगवति भजत्यात्मनि स्थैर्यमाशु

प्रक्षिप्याज्ञानभावं स भवति न चिराच्छुद्धबुद्धस्वरूपः॥ ३२॥

टी० च०—ज्ञानस्य परिपूर्णात्मसचेतनाभावात्परिपूर्णस्यैकस्यात्मनोपि ज्ञानं न सिद्ध्येदिति ॥ ३२ ॥

इति स्वोपज्ञाध्यात्मबिंदुविवरणे सदुपाध्यायश्रीमद्धर्षवर्धनविरचिते प्रथमा द्वात्रिंशिका समाप्ता ।

No. 1174.

अष्टलक्षी वा अर्थरत्नावली—समयसुन्दरः ।

आ०—श्रीसूर्यः श्रेयसे भूयाद्भक्तितत्परभूस्पृशाम् ।

यस्य नामसहस्रस्य जपः पापहरो भवेत् ॥ १ ॥

सांनिध्यं कुरुते ब्राह्मी देवता वरदायिनी ।

सेवका यत्प्रसादेन साधयंतीप्सितं फलम् ॥

राजा नो दद्ते सौख्यमिति श्लोकैकपादस्य मया निजबुद्धिवृद्धिनिमित्तं अर्थाः क्रियते । तत्र प्रथमं श्रीसूर्यदेववर्णनमाह ।

राजा नो दद्ते सौख्यम् ॥
सावित्री भविता राजा विसृजो विघृणो विराट् ।
सप्तार्चिः सप्ततुरगः सप्तलोकनमस्कृतः ॥ १ ॥

इति स्कंदपुराणे श्रीसूर्यसहस्रनामांतर्भणितत्वात् । राजा श्रीसूर्यः नोऽस्माकं सौख्यं दद्ते ददाति ।

च०—अष्टलक्षार्थी संपूर्णा । अघटिताविसंवादिनी च ज्ञेया ।
सर्वे ८०००० ॥ अथ प्रशस्तिः ॥

वर्धमानो जिनो जीयाद्वर्धमानो गुणव्रजैः ।
तीर्थं यदीयमद्यापि जागर्ति जगतीतले ॥ १ ॥

श्रीगौतमाद्या गणधारिवर्या
यच्छंतु मे वाञ्छितमच्छबुद्धयः ।
यद्वाक्यमुक्ताफलदाम रामं
कुर्वंति कंठे कृतिनः प्रकामम् ॥ २ ॥

श्रीहरिभद्रमुनींद्रप्रमुखा मां पूर्वसूरयः पांतु ।
इमंजुग[शुद्धहृदयमंजूप]मध्ये यद्गुणरत्नानि धार्यंते ॥ ३ ॥

श्रीमद्देवाचार्याः पूर्वाचार्या प्रभूतगुणवर्याः ।
समभूवन्भवसागरतरणे वरतरणचरणयुगः ॥ ४ ॥

तत्पट्टमलंचक्रे नेमिचंद्राख्यसूरिराट् ।
यद्वचोऽमृतपानेन प्रापुर्निर्जरतां नराः ॥ ५ ॥

तदनु द्योतविद्योती सूरिरुद्योतनोऽभवत् ।
उद्यद्विहारविख्यातः प्रद्योतन इवाद्भुतः ॥ ६ ॥

यकशोधर्यैमासथे[यक्कःशोधयामास ये]सूरिमंत्रं
गिरिद्रार्बुदस्याद्भुते श्रृगभागे ।
विधायाष्टम सुनमन्नागनाथ-
स्ततोऽर्धमानाभिधः सूरिरासीत् ॥ ७ ॥
श्रीमद्दुर्लभराजराजसदसि श्रीपत्तने पत्तने
वाद श्वेतपटै. प्रभूतकपटैः साक सदा लपटैः ।
कृत्वा य· प्रकटीचकार वसतेर्मार्गं मनोहारिण
सूरिजयो[सूरिर्भूरिजयो]जिनेश्वरगुरुर्जातो
जगद्विश्रुतः ॥ ८ ॥
संवेगरंगशाला येन कृता जगति लोकहितहेतुः ।
जात. श्रीजिनचंद्रः सूरिस्तत्पट्टम[ग]श्चंद्रः ॥ ९ ॥
अतिचंगनवांगवृत्तिकार खरतरगणनायक सुगणधीर ।
यशसायुत जय चिरमभयदेव भूरीश्वरकृतचरणसेव॥१०॥
कृत्वा समीपेऽभयदेवसूरि[ रे ]र्येनोपसंपद्ग्रहणं प्रमोदात् ।
पपौ रहस्यामृतमागमानां सूरिस्ततः श्रीजिनवल्लभोऽभूत् ॥११
जिग्यिरे येन योगिन्यश्चतुःषष्टिर्यतीदुना ।
सूरिः श्रीजिनदत्तोऽभूत्तत्पट्टांबुजभास्करः ॥ १२ ॥
ततस्तनुभृतां प्रिय· समजनिष्ट शिष्टक्रियः
प्रणष्टतिमिरोत्करः सुजिनचंद्रसूरीश्वरः ।
· कविवरसुममालिको नरमणीमनोज्ञालिको
तमभि[ततो नि]खिलनायक· प्रबलसौख्य-
सदायकः ॥ १३ ॥
जिनपतिसूरिर्जिनेश्वरसूरीश्वरजिनप्रबोधजिनचंद्रा ।
तत्पट्टानुक्रमतोऽभूवन्भूपीठविख्याता ॥ १४ ॥

यस्यादेशाद्दरतरवसत्याख्यचैत्यं प्रचक्रे
तेजःपालो विपुलविभवोपि स्वयं तत्र चैत्ये ।
- - - - - - - - - - - - - - -
यः प्रातिष्ठित्रिभुवनगुरोः शांतिनाथस्य विंबम् ॥ १५ ॥
सोऽभून्द्रीमज्जिनकुशलराट् सूरिराजीतुरापाट्
- - - - - - - - - - - - - - -
- - - - - - - - - - - - - - -
- - - - - - - - - - - - - - - ॥ १६ ॥
(प्राप्या)नेकविवेकसेकविलसत्क्ष्मापालजंबालज-
प्रत्यग्रप्रतिबोधबंधुररविः प्रत्यर्थिभूभृत्पविः ।
चक्रुर्बालसरस्वतीति सुतरां ख्यातिं क्षितौ प्राप्य न
- - - - - - - - - - - - - - -
- - - - - - - - - - - - - - -॥ १७ ॥
तदनु विगततंद्राः पश्चिमांभोधिमंद्रा
कुशलकुमुदचंद्रा प्रतभ[द्राःपूर्वभृ]त्यांगिभद्राः।
प्रणमदमरचंद्रा निर्जितश्लोकचंद्रा
इह भुवि जिनचंद्राः सूरिराजीसुरेंद्राः ॥ १८ ॥
यद्दीक्षिताः समभवन् यतिनः सुशिष्याः
श्रीह्वास्य[श्राद्धाथ]संघपतयोऽर्पितवासयोगात् ।
प्राप्तोदयः प्रवरलब्धिसमृद्धिसिद्धेः
पात्रं ततोऽजनि जिनोदयसूरिराजः ॥ १९ ॥
रेजिरे राजराजास्या राजराजिनमस्कृताः ।
श्रीजिनराजसूरींद्रा भव्यराजीवभास्कराः ॥ २० ॥
श्रीमज्जेसलमेरुदुर्गनगरे जावालपुर्यां तथा
श्रीमद्देत्रगिरौ तथा अहिपुरे श्रीपत्तने पत्तने ।

भांडागारमबीभरद्वरतरैर्नानाविधैः पुस्तकैः
स श्रीमज्जिनभद्रसूरिसुगुरुर्भाग्याद्भुतोऽभूद्भुवि ॥ २१ ॥

ततः क्रमाच्छ्रीजिनचंद्रसूरिः
समुद्रसूरिर्जिनहंससूरिः ।
माणिक्यसूरिर्गुणरत्नसूरि-
र्जातस्ततः सारविचारसूरिः ॥ २२ ॥

तदीयपदपूर्वाद्रिप्रकाशनरविप्रभाः ।
श्रीजिनचंद्रसूरींद्रा जयति जयिनोऽधुना ॥ २३ ॥

येभ्यो मुदादायि युगप्रधानपदं प्रभुश्रीमदकब्बरेण ।
प्रभूतभाग्योदयसुप्रसिद्धा जयंतु ते श्रीजिनचंद्रसूरय.॥२४॥

श्रीसाहिवाक्याद्गुरुभिः प्रमोदा
(द्ये स)यमाचार्यपदे प्रतिष्ठिताः ।
जगत्ययशोराशिविराजमाना
जयतु ते श्रीजिनचद्रसूरयः ॥ २५ ॥

तच्चारुचरणांभोजचंचरीकमनाः सना ।
गणिः सकलचंद्राख्यो विख्यातो मुख्यशैक्षकः ॥ २६ ॥

तच्छिष्योऽस्त्यस्तिवृद्ध्यर्थं गणिः समयसुंदरः ।
वाचकः सव्यधात्तयक्षिम[द्दष्टलक्ष्मीं]रत्नावलीमिमाम् ॥२७॥

श्रीजिनसिंहमुनीश्वरवाचकवरसमयराजगणिराजाम् ।
मह्यैकगुरूणामनुग्रहो मेऽत्र विज्ञेयः ॥ २८ ॥

मत्सरेणाहतो मूर्खोऽसहमानः परोन्नतिम् ।
सच्छास्त्रं दूषयत्येव वारिकुंभमरिष्टवत् ॥ २९ ॥

मात्सर्यमुत्सार्य विचार्य सम्यग्
ज्ञात्वा प्रयास समदुष्करत्वम् ।

कृत्वा प्रसादं कवयो गुणज्ञाः
प्रमाणयंतु स्फुटमेतदर्थान् ॥ ३० ॥
यदत्र काव्ये मतिमांद्यदोष-
वशादशुद्धं किमपि स्फुटं स्यात् ।
विशोधयंतुमधियो प्रसद्य[धियःप्रसद्य]
तूर्णं यथा निर्मलसौधकुंडन्[डात्] ॥ ३१ ॥
श्रीविक्रमनृपवर्षात्समये रसजलधिरागसो[गो]समेते ।
श्रीमल्लाभपुरेऽस्मिन् वृत्तिरियं पूर्णतां नीता ॥ ३२ ॥
अर्थरत्नावलीवृत्तिः कविकंठावलंबिनी ।
वाच्यमाना चिरं नंद्याद्यावचंद्रदिवाकरौ ॥ ३३ ॥

No. 1175.

आचाराङ्गदीपिका—जिनहंससूरिः ।

आ०—॥ अर्ह ॥ शासनाधीश्वरो जीयाद्वर्धमानो जिनेश्वरः ।
भवन्ति सुखिनो भव्या यदीयवचनामृतैः ॥ १ ॥
शीलाङ्काचार्यरचिता वृत्तिरस्ति सविस्तरा ।
श्रीआचाराङ्गसूत्रस्य दुर्विगाहा परं ततः ॥ २ ॥
अनुग्रहार्थं सभ्यानां व्याख्यातॄणां सुखावहा ।
श्रीजिनहंससूरीन्द्रैः क्रियते स्म प्रदीपिका ॥ ३ ॥

च०—श्रीबृहत्खरतरगच्छे श्रीजिनसमुद्रसूरिपट्टालंकारश्रीजिनहंससूरिविरचितायां श्रीआचारांगदीपिकायां द्वितीयः श्रुतस्कंधः समाप्तः ॥

श्रीवीरशासने क्लेशनाशने जयिनि क्षितौ ।
सुधर्मस्वाम्यपत्यानि गणाः सन्ति सहस्रशः ॥ १ ॥

No 1178.

आराधनापताका—वीरभद्राचार्यः ।

आ°—नियसुचरियगुणमाहप्पदिप्पसुररायरिद्धिवित्थारो ।
जयइ सुररायपूइयगुणमाहप्पो महावीरो ॥ १ ॥
च°—इय सुंदराइं वीरभद्दभणियाइं पवयणाहिंतो ।
चिरमुचिणि सुए एसा रइआ आराहणापडिया ॥ ८ ॥
षण्णाणमाणुपुव्वी गाहद्धपयाण पाययाणं च ।
कत्थइ कहिंचि रइया पुव्वपसिद्धाण समईए ॥ ८६ ॥
आराहणापसत्थंमि एत्थ सत्थंमि गंधपरिमाणं ।
नउयाइं नवसयाइं अत्था गाहांमि गाहाणं ॥ ८७ ॥
विक्कमनिवकालाउ अट्ठुत्तरिमे समासहस्संमि ।
एसा सव्वं गिहिआ गहिया गाहाहि सरलाहिं ॥ ८८ ॥
मोहेण मंदमइणा इमंमि जमणागमं मए लिहिय ।
तं महरिसिणो मरिसिंतु अहवा साहिंतु करुणाए ॥८९॥
भवगहणभमणरीणा लहति निव्वुइसुहं जमल्लीणा ।
तं कप्पद्दुमसुहयं नंदउ जिणसासणं सुइरं ॥ ९० ॥
आराधनापताका कृतिरियं श्रीवीरभद्राचार्यस्य ॥ छ ॥

No 1182.

आवश्यकलघुवृत्तिः—तिलकाचार्यः

च°—महोदयपदायामिरिति ॥ छ ॥

इति श्रीश्रीतिलकाचार्यविरचितायामावश्यकलघुवृत्तौ प्रत्याख्यानाध्ययनं समाप्तम् ॥६९६॥ तत्समाप्तौ समाप्तेयमावश्यकलघुवृत्तिः ।

तीर्थे वीरविभो सुधर्मगणभृत्सतानलब्धोन्नति-
श्चारित्रोज्ज्वलचन्द्रगच्छजलधिप्रोल्लासशीतद्युतिः ।

साहित्यागमतर्कलक्षणमहाविद्यापगासागरः
श्रीचंद्रप्रभसूरिरद्भुतमहावादीभसिंहोऽभवत् ॥ १ ॥
तत्पट्टलक्ष्मीश्रवणावतंसाः श्रीधर्मघोषप्रभवो बभूवुः ।
यत्पादपद्मे कलहंसलीलां दधौ नृपः श्रीजयसिंहदेवः ॥ २ ॥
तत्पट्टोदयशैलशृंगमभजत्तेजस्विचूडामणिः
श्रीचक्रेश्वरसूरिरित्यभिधया कोऽप्यत्र भानुर्नवः ।
संप्राप्ताभ्युदयः सदैव तमसा नो जातु विच्छायितो
नैवोचंडरुचिः कदाचिदपि न प्राप्तोपरागस्ततः ॥ ३ ॥
विललास स्वैरं तत्पट्टप्रासादचंद्रशालायाम् ।
श्रीमान् शिवप्रभगुरुः संयमकमलाकृतासक्तिः॥ ४ ॥
श्रीशिवप्रभसूरीणां तेषां शिष्योस्मि मंदधीः ।
नाम्ना श्रीतिलकाचार्यः श्रुताराधनगृद्धिभाक् ॥ ५ ॥
एतां वृत्तिं लघुमविषमां सोहमावश्यकीयां
तत्पादाब्जस्मरणमहसा मुग्धधीरप्यकार्षम् ।
तद्यत्किंचिद्विभसत्रशतो दृब्धमस्यामशुद्धं
तत्संशोध्यं मयि कृतकृपैः सूरिभिस्तत्त्वविद्भिः ॥ ६ ॥
वृत्तिं रचयता चैतां सुकृतं यन्मयार्जितम् ।
भवे भवेहं तेन स्यां श्रुताराधनतत्परः ॥ ७ ॥
शतद्वादशके ऽब्दानां गते विक्रमभूभुजः ।
संवत्सरे षण्णवती वृत्तिरेषा विनिर्ममे ॥ ८ ॥
शिष्या नः शस्यचारित्राः सर्वशास्त्राब्धिपारगाः ।
अस्यां सहायकं चक्रुः श्रीपद्मप्रभसूरयः ॥ ९ ॥
शिष्योस्माकमिमां वृत्तिमखिन्नः शास्त्रतत्त्ववित् ।
अलिखत्प्रथमादर्शे पद्मास्तिलकपंडितः ॥ १० ॥

संत्यस्यां द्वादशश्लोकसहस्रा·पचतु.शताः ।
प्रत्यक्षरेण सख्यानादिति निश्चितवानहम् ॥ ११ ॥
यावद्विजयते तीर्थं श्रीमद्वीरजिनेशितुः ।
तावदेषा मरालीव खेलतात्कृतिमानाम[मानसे]॥ १२ ॥

No. 1187.

उत्तराध्यनसूत्रटीका—कीर्त्तिवल्लभगणिः ।

आ०—अर्हं भिक्षोर्विनय प्रादु करिष्यामि प्रकटीकरिष्यामि आनुपूर्व्या क्रमेण मे मम विनय कथयतो वदतो यूयं शृणुत ।

च०—२७२—इति समाप्तौ ब्रवीमि । सुधर्मस्वामी जबूस्वामिनं प्रति प्राह । इत्युक्त षट्त्रिंशाध्ययन जीवो जीवविभक्त्याख्यम् ॥३६॥

इति श्रीउत्तराध्ययनवृत्ति· सपूर्णा ।

आसीच्छ्रीवीरपट्टे प्रवरगणधरः श्रीसुधर्माभिधान-
स्तत्पट्टे स्वामिजबूप्रभवमुखमहासूरिराजा बभूवु ।
सर्वेषा( मेव धाम्नां ) स्फुटपटुपदवीभाग्धर्त्ता महेंद्रः
सूरीद्राणामशेषक्षितितलविदितो मेरुतुंगो मुनींद्र. ॥ १ ॥
तत्पट्टांबुजराजहससदृशो विद्यावतामीश्वरः
श्रीमच्छ्रीजयकीर्त्तिसूरिसुगुरुस्तत्पट्टचूडामणिः ।
सूरि. श्रीजयकेसरिप्रभुगुरुस्तत्पट्टपद्मेश्वरः
सिद्धातानुगसागरो विजयते सूरीश्वर· साप्रतम् ॥ २ ॥
तच्छिष्यो ननु कीर्त्तिवल्लभगणिर्मुग्धाग्रणी मोहतो
स्पष्टव्याकरणोक्तिवृत्तिमलिखन्मुग्धप्रबोधप्रदाम् ।
पूर्वैर्निर्मितदीपिकादिकमहाग्रथानुसारी स्वक-
प्रज्ञावेदनश्च [नतो ह्य]सौ वसुगुरुप्रौढप्रसत्ते. पुन· ॥ ३ ॥

संवत्पंचदशे द्विपंचगणिते वर्षे च हर्षप्रदे
सुश्रीअह्मदवादनाम्नि नगरे दीपोत्सवे निर्मिता ।
यावच्छ्रीजिनशासनं विजयते सर्वोत्सवं (सर्वं) त-
स्तावन्नंदतु वृत्तिका कविजनै(ःसं) वाच्यमाना सदा ॥ ४ ॥
कार्याल्पकुव्यतया मया पुनरियं संशोधिता नास्ति भो
विद्वद्भिस्तु परोपकारनिरतैः शोध्या विशुद्धात्मभिः ।
वृंदैस्तुच्छतया यदत्र किमपि न्यूनं तथा चाधिकं
तत्सर्वं क्षमितव्यमुत्तमतमैर्बद्धं विरुद्धं च यत् ॥ ५ ॥
अष्टौ सहस्रा द्विशती च षष्टिः श्लोकास्ततश्चोपरि पंचवर्णाः ।
प्रत्येकवर्णं परिमाणमेतद्ग्रंथस्य विज्ञायममेयशोभैः ॥ ६ ॥
इति उत्तराध्ययनवृत्तिः संपूर्णा ॥

No. 1204.

उपदेशसप्ततिका—सोमधर्मगणिः ।

आ°—श्रीसोमसुंदरगुरूज्ज्वलकीर्त्तिपूरः
श्रीवर्धमानजिन एष शिवाय वामः ।
भव्या भवंति सुखिनो यदुदाहृतं श्री-
चारित्ररत्नममलं परिपालयंतः ॥ १ ॥
श्रीरत्नशेखरगुरुप्रवरा जयंतु
नैकक्ष्माधरनिषेव्यपदारविंदाः ।
ऐदंयुगीनमुनिषु प्रवरक्रियेषु
श्रीसार्वभौमपदवीं दधतेऽधुना[ता]युः ॥ २ ॥
कथाप्रबंधादिषु भूरिविस्तरेष्वनादरं ते दधते ऽल्पमेधसः ।
हिताय तेषामुपदेशसप्ततिः प्रारभ्यते सर्वजनोपयोगिनी ॥ ३ ॥

च°—एवं देवज्ञानसाधारणादि द्रव्यं व्यक्तया स्थापनीयं सुयुक्तया।
व्यापार्यं च श्रावकैस्तत्त्वविज्ञैर्निर्लेपत्वं स्यात्तथा चिंतनीयम्॥२३॥
इति पंचमेऽधिकारे सप्तदश उपदेशाः। मूलतः कथाः॥ ७५
इति श्रीपरमगुरुतपाश्रीसोमसुंदरसूरिक्रमकमलमरालमहोपाध्याय-
श्रीचारित्ररत्नगणितद्विनेय पं॰ सोमधर्मगणिविरचितायां श्रीउपदेशसप्ततौ
पंचमोऽधिकारः। समाप्ता चेयं श्रीउपदेशसप्ततिका॥ ग्रंथाग्रं ३०००॥

## No. 1205.

उपसर्गहरस्तोत्रं सटीकम्—मू॰ भद्रबाहुः टी॰पार्श्वदेवगणिः।

टी॰आ॰—धरणेंद्रं नमस्कृत्य श्रीपार्श्वं मुनिपुंगवम्।
उपसर्गहरस्तोत्रवृत्तिं वक्ष्ये समासतः॥ १॥

मू॰आ॰—उवसग्गहरं पासं पासं वंदामि कम्मघणमुक्कं।
विसहरविसनिन्नासं मंगलकल्लाणआवासं॥ १॥

मू॰च॰—इय संथुउ महायस भत्तिब्भरनिब्भरेण हियएणं।
ता देव देज्ज बोहिं भवे भवे पासजिणचंदो॥ ९॥

टी॰च॰—सर्वकल्याणं संपद्करी यंत्रं भवति। द्विजपार्श्वदेवगणि-
विरचिते यत्किमपि धरणेंद्रपार्श्वयक्षपद्मावतीप्रमुखाभिः स्वदेवताभिर्मम
क्षमितव्यमिति। यच्च किंचिद्विरुद्धयंत्रं मंसित [मंत्रितं] सर्वस्य मिथ्या
दुष्कृतमिति॥ ॥ इति श्रीउवसग्गहरस्तोत्रस्य वृत्तिः समाप्ता॥
संवत्सरे विक्रमनृपतौ सप्तनंदकाय भूयुते। वर्षे आश्विनमासे शुभ्रपक्षे
दुर्गाष्टम्यां तिथौ लिखितं जगजीवनर्षिणा स्वात्महेतवे॥

## No. 1209.

ऋषिमण्डलवृत्तिः—शुभवर्धनः।

आ॰—योऽभूद्युगादौ शिवशुद्धमार्गप्रकाशकत्वाद्रविरेव साक्षात्।
गोभिः स्वकीयैः प्रहरंस्तमांसि स नाभिभूर्भूरिविभूतये वः॥१॥

पत्रे ४१६ इति श्रीतपागच्छाधिराजे श्रीसोमसुंदरसूरिसंताने श्री-लक्ष्मीसागरसूरिश्रीसुमतिसाधुसूरिपट्टप्रतिष्ठपरमगुरुश्रीहेमविमलसूरि-विजयमानराज्ये पंडितप्रकांडमंडलीशिरोमणिपंडितश्रीसाधुविजय-गणिशिष्यपरमाणुपंडितशुभवर्धनगणिप्रणीतायां ऋषिमंडलवृत्तौ द्वित-यखंडे श्रीहस्तविहस्तर्षिसंबंधः ।

च०—अवसर्पिण्यां चरमं दुःसहं मुनिवृषभं दुःषमाचार्यं वंदे ।

ऋषिमंडलवृत्तिः संपूर्णा ।

इति श्रीतपागच्छाधिराजश्रीसोमसुंदरसूरिसंताने -------- ------------- ग्रंथाग्रं १८०००.

No. 1213.

ओघनिर्युक्तिः सटीका । मू० भद्रबाहुः । टी० द्रोणाचार्यः ।

टी० आ०—नमो अरिहंताणं...

अर्हत्स्त्रिभुवनराजपूजितेभ्यः
सिद्धेभ्यः सतघनकर्मबंधनेभ्यः ।
आचार्यश्रुतधरसर्वसंयतेभ्यः
सिद्ध्यर्थी सततमहं नमस्करोमि ॥ १ ॥

मू० आ०—अरहंते वंदित्ता चउदसपुव्वी तहेव दसपुव्वी ।
एक्कारसंगसुत्तत्थधारए सव्वसाहू य ॥ १ ॥

मू० च०—एसा समायारी कहिया धीरपुरिसपन्नत्ता ।
सजमतवड्ढगाणं निग्गंथाणं महरिसीणं ॥

टी० च०—सुगमा०—इय उघसमायारिं जुंजंता चरणकरणमाउत्ता ।
साहू खवंति कम्मं अणेगभवसंचियमणंतं ॥

सुगमा०—एसा अणुग्गहत्था फुडवियडविसुद्धवंजणाइन्ना ।
इक्कारसहिं सएहिं एगुणनेहिं सम्मत्ता ॥

सुगमा०—उघनिर्युक्तिटीका समाप्ता ॥ कृतिरियं द्रोणाचार्यस्येति ।

No. 1216

कथारत्नाकरः—उत्तमर्षिः ।

आ°—पार्श्वनाथं जिनं नत्वा सद्गुरुं च विशेषतः ।

कथारत्नाकरं नाम क्रियते शर्महेतवे ॥ १ ॥

पत्रे७३ इति श्रीधर्मकथारत्नाकरोद्धारे श्रीमत्प्रवरपंडिते[नि॰] सकलशास्त्रज्ञश्रीमदुत्तमर्षिभिः द्वितीयखंडस्संपूर्णीकृतः॥ २॥

च°—इति साधुनिंदायां रुक्मिणीपूर्वभवकथा २०९

अपूर्णः ।

No 1218.

कर्मग्रन्थः—मा°देवेन्द्रसूरिः ।

च°—अइसुइरसयलजगसिहरगरुयनिरुवमसहावसिद्धिसुहा ।

अरिहा निव्वाबाहा तिरियं संसारअ[म]गुहवंति ॥ ९० ॥

दुरहिगमनिउणपरमत्थरुहिरबहुभमिदिट्ठिवाया ।

अत्थाणुसरियव्वा बंधोदयसंतकम्माणं ॥ ९१ ॥

जो जत्थ अपडिपुन्नो अत्थो अप्पागमेण बद्धुत्ति ।

तं खमिऊण बहुसुया पूरेऊणं परिकहंतु ॥ ९२ ॥

गाहग्गं सयरीए चंदमहत्तरमयाणुसारीए ।

टीकाइ नियमियाणं एगूणं होइ नवईउ ॥ ९३ ॥

इति सप्तशतिकासूत्रं समाप्तम् ।

षट्कर्मग्रंथमिदं। संवत् १९६३ वर्षे आसाढवदि ९ दिने।

No. 1223.

कल्पसूत्रम्—सावचूरि ।

च° ग्रं° १२१६ ॥ इति कल्पसूत्रं संपूर्णं लिखितं उंसारिग्रामे पं° लावण्यभद्रगणिना ॥

नागपुरेनेमिभवनप्रतिष्ठया महितपाणिसौभाग्यः ।.
अभवद्वीराचार्यस्त्रिभिः शतैः समधिके राज्ञः॥ १ वि०३०० ॥

वत्सो नरसिंहसूरिरासीदतोऽखिलग्रंथपारगो येन ।
यक्षो नरसिंहपुरे मांसरतिं त्याजितः स्वगिरा॥ २ वि०१०९९॥?

खोमाणराजकुलजो व समुद्रसूरि-
र्गच्छं शशास किल यः प्रवरः प्रमाणी ।
जित्वा तदा क्षपणकान्स्ववशं वितेने
नागह्रदे भुजगनाथनमस्यतीर्थं ॥ ३ ॥

विद्यासमुद्रहरिभद्रमुनींद्रमित्रं
सूरिर्बभूव पुनरेव हि मानदेवः ।
मांद्यात्प्रयातमपि योनघसूरिमंत्रं
लेभेंबिकामुखगिरा तपसोज्जयंते ॥ ४ वि० ११११९ ॥?

दिनकृत्य ९ कर्मग्रंथसिद्धपंचाशिकासूत्रवृत्तयः धर्म्मरत्नवृत्तिसु-दर्शनाचरित्रभाष्यादयः स्वकृताः ॥ पूर्वं श्रीविजयचंद्रसूरिणा । श्रीदेवेंद्रसूरिषु मालवकदेशं गतेषु गच्छावर्जननिमित्तं समस्तगीतार्थै पृथक् २ वस्त्रपुट्टलिकाप्रदानं १ नित्यंविनद्ध ?.त्यनुज्ञा २ चीवरक्षालनं ३ फलशाकग्रहणं ४ नीवीप्रत्याख्याने निर्वि तक? ग्रहणं ५ साधूनां द्विविधाहारप्रत्याख्यानं ६ आर्यिकाविहृतभोगः ७ गृहस्थप्रतिक्रमणकारापण ८ सविभागदिने गृहे गीतार्थगमन ९ लेपसांनिध्यभावं १० तत्कालोष्णोदकग्रहणं ११ इति गोत्रिकवृद्धशालीयसमाचारी ॥ वि० ९९३ वि० ९९३ कालिकाचार्येण चतुर्थ्यां पर्युषणापर्वानीतं ९९४ तस्य स्वर्ग॰ वि० १००० सुमित्रे १० पूर्वविच्छेदः ॥

No. 1227.

कालसप्ततिः—सावचूरिः । मू०. धर्मघोषः ।

आ०टी०—देवेंद्रनतं विद्यानंदमयं धर्मकीर्तिकुलभवनं
आ०मू०—देविंदणयं विज्जाणंदमयं धम्मकित्तिकुलभवणं
च०मू०—इय बारसारचक्कं कप्पो तेणंतपुग्गलपरावट्टो ।
तेऽणंतातीअद्धा अणेगयऽद्धा अणंतगुणा ॥ ७३ ॥
सिरिदेविंदमुणीसरविणेअसिरिधम्मघोससूरीहिं ।
अप्पपरजाणणट्ठा कालसरूवं किमवि भणिअं ॥७२॥
इति कालसत्तरीसूत्रम् ।
च०टी०—कल्पो भवति तैरनंतैः पुद्गलपरावर्तः तेऽनंता अतीताद्धा।
ततोऽप्यनंतगुणा अनागताद्धा ॥ ७२ ॥ कालसप्तत्यवचूरिः।

No. 1230.

कुमारपालप्रबन्धः—जिनमण्डनः ।

आ०—ॐ नमः श्रीमहावीरजिनेंद्राय परात्मने ।
परब्रह्मस्वरूपाय जगदानंददायिने ॥ १ ॥...
उक्तं च ।
आज्ञावर्तिपु मंडलेपु विपुलेष्वष्टादशस्वादरा-
दब्दान्येव चतुर्दश प्रसृमरां मारिं निवार्योजसा ।
कीर्तिस्तम्भनिभान् चतुर्दशशतीसंख्यान्विहारांस्तथा
कृत्वा निर्मितवान् कुमारनृपतिर्जैनो निजैनोव्ययम् ॥ १ ॥
च०—संवत् ११४५ कार्तिकपूर्णिमानिशि जन्म श्रीहेमसूरीणां
संवत् ११५४ दीक्षा सं० ११६६ सूरिपदं सं० १२२९ स्वर्गः ।...
प्रबंधो योजितः श्री(मत्)कुमारनृपतेरयम् ।
गद्यपद्यैर्नवैः कैश्चित्कैश्चित्प्राक्तननिर्मितैः ॥ ६ ॥

श्रीसोमसुंदरगुरोः शिष्येण यथाश्रुतानुसारेण ।
श्रीजिनमंडनगणिना व्यंक १४९२ मनुप्रमितवत्सरे रुचिरः॥७

इति श्रीसोमसुंदरसूरीश्वरशिष्यश्रीजिनमंडनोपाध्यायैः श्रीकुमारपालप्रबंधो यथादृष्टश्रुतानुसारेण योजितः चिरं जीयात्॥

No. 1232.

क्षुल्लकभवावलिका—सावचूरिः—तथा

पुद्गलपरावर्त्तस्तोत्रं सावचूरि ।

आ० टी०—वंदित्ता० सुगमा नवरं क्षुल्लकभवानामावलिकानां च स्वरूपं कियंतो भवाः कियंत्यो वा आवलिका उच्छ्वासादौ कथं वा सभवंति

आ०मू०—वंदित्ता सिरिवीरं देविंदनरिंदमहियपयकमलं ।
खुड्डभवाण सरूवं आवलिआण च वुच्छामि ॥१॥

च०मू०—एगभवावलिगुणिआ हरिआ विअ निअनिआवलिआ
२४ खुड्डा०

च०टी—समसमतिगुणाकृता हताश्च निजनिजस्तोकावलिका भवंति यथा २४ खुड्डा० क्षुल्लकविचारोन्ययाभूतो विपरीतः शोध्यः॥ २९

इति क्षुल्लकभवावलिकावचूरिः समाप्ता ।

आ०टी०—हे श्रीवीतराग हे भगवन् मे मम पुद्गलावर्त्ता अभवन् कस्मिन्

आ०मू०—श्रीवीतरागभगवंस्तव समयालोकनं विनाभूवन् ।
द्रव्ये क्षेत्रे काले भावे मे पुद्गलावर्त्ताः ॥ १ ॥

च० मू०—नानापुद्गलपुद्गलावलिपरावर्त्तानेनंतानहं
पूरं पूरमियचिरं कियदशं बाढं दृढं नोटवान् ।

दृष्टादृष्टिचरं भवंतमधुना भक्त्यार्थयामि प्रभो
तस्मान्मोचय रोचय स्वचरणं श्रेयःश्रियं प्रापय ॥ ११ ॥

इति पुद्गलपरावर्त्तस्तोत्रं समाप्तम् ।

च॰टी॰—श्रेणयस्ता येन दृष्टादृष्टिचरं किं प्रार्थयामि तदेवाह ।
असुखान्मोचय स्वचरणं रोचय मां श्रेयःश्रिय प्रापय ॥ ११ ॥

इति श्रीपुद्गलपरावर्त्तस्तोत्रस्यावचूरिः समाप्ता ॥

No 1239.

चन्द्रप्रभचरित्रम्—देवेन्द्राचार्यः ।

आ॰—दृष्टोपि हृष्टजनलोचनचंद्रकांत-
मभ्रांतमांतरजलाविलमादधानः ।
चंद्रप्रभोर्जयति चंद्र इवेशमित्र
चित्रं पुनः शुभशताय यदष्टमोपि ॥ १ ॥

च॰—सुपार्श्वस्वामिनिर्वाणात् श्रीचंद्रप्रभनिर्वृतिः ।
शतेष्वर्णवकोटीनां व्यतीतेषु नवस्वरात् ॥ ३२

इति श्रीदेवेंद्राचार्यविरचिते श्रीचंद्रप्रभस्वामिचरिते भवत्रयवर्णनो नाम द्वितीयः परिच्छेदः ॥ २ ॥ ॥ समाप्तं चेदं चंद्रप्रभस्वामिचरित्रम् ॥

नागेंद्रगच्छे विख्याताः परमा(स)न्वयोत्तमाः ।
श्रीवर्धमाननामानः सूरयोऽस्तारयोऽभवन् ॥ १ ॥
गुणग्रामाभिरामोऽथ रामसूरिर्बभूव सः ।
यदास्यकमलक्रोडे चिक्रीडुर्वचनश्रियः ॥ २ ॥
सिद्धांतादित्यमाश्रित्य कलापूर्णः सुवृत्तभाक् ।
चंद्रवच्चीतिदः सोऽभूच्चंद्रसूरिस्ततः परम् ॥ ३ ॥

विद्यावल्लीवृक्षः संयमप्रतिमारथः ।
संसाराब्धिमहायानं देवसूरिगुरुस्ततः ॥ ४ ॥
सिद्धविचारसस्पर्शात्सुवर्णत्वमुपागतम् ।
शिष्याभयसूरीणां वचस्तारमुपास्महे ॥ ५ ॥
निर्यास्यान्यगिरश्चित्तान्यवष्टभ्य स्थिता नृणाम् ।
यद्वाक् सोऽभूज्जगत्ख्यातः श्रीमद्धनेश्वरः प्रभुः ॥ ६ ॥
यद्वाग्गंगा त्रिभिर्मार्गैस्तर्कसाहित्यलक्षणैः ।
पुनाति जीयाद्विजयसिंहसूरिः स भूतले ॥ ७ ॥
श्रीधनेशपदे सूरिर्देवेंद्राख्यः स्वभक्तितः ।
पुण्याय चरितं चक्रे श्रीमच्चन्द्रप्रभप्रभोः ॥ ८ ॥

अपूर्णम् ।

No. 1241.

चैत्यवन्दनवृत्तिः—हरिभद्रः ।

आ०—प्रणम्य भुवनालोकं महावीरं जिनोत्तमम् ।
चैत्यवंदनसूत्रस्य व्याख्येयमभिधीयते ॥ १ ॥
अनंतगमपर्यायं सर्वमेतज्जिनागमे ।
सूत्रं यतोऽस्य कार्त्स्न्येन व्याख्यां कः कर्तुमीश्वरः ॥ २ ॥
यावत्तथापि विज्ञातमर्थजातं मया गुरोः ।
र्गच्छाधीशः कम्रकांतिः कलावान् ॥ ३२ ॥
तस्याभूच्च गुरुभ्राता नाम्ना सकलभूषणः ।
सूरिर्जिनमते लीनमनाः संतोषपोषकः ॥ ३३ ॥
तेनोपदेशसद्रत्नमालासंज्ञो मनोहरः ।
कृतः कृतिजनानंदनिमित्तं ग्रंथ एषकः ॥ ३४ ॥
श्रीनेमिचंद्राचार्यादियतीनामाग्रहात्कृतः ।
सद्धर्मानाटोलादिप्रार्थनातो मयैषकः ॥ ३५ ॥
सप्तविंशत्यधिके षोडशशतवत्सरे सुविक्रमतः ।
श्रावणमासे शुक्लपक्षे पष्ठ्यां कृतो ग्रंथः ॥ ३६ ॥
न मया ख्यातिनिमित्तं न चाभिमानेन विरचितो ग्रंथः ।
धर्मरतानां गृहिणां हिताय च स्वस्य पुण्याय ॥ ३७ ॥

यावत्सिद्धाः सिद्धिधामप्रपन्ना
मेर्वाद्या वै भूरिधरा भूरिसंख्याः ॥
चंद्रादित्याद्याश्च खे ऽसंख्यसंख्या
संतिष्ठंते तावदास्तां ममायम् ॥ ३८ ॥
श्रीवीरगौतमाद्यैश्च श्रेणिकस्य पुरः पुरा ।
यदुक्तं तच्च संक्षिप्य मयापीहं निरूपितम् ॥ ३९ ॥
सिद्धांतशब्दयुक्त्यादिविरुद्धं यन्मयोदितम् ।
क्षमितव्यं मुनीशैस्तत्सर्वशास्त्राब्धिपारगैः ॥ ४० ॥
न्यूनमक्षरमात्राद्यैरज्ञानान्मयकात्र यत् ।
प्रोक्तं क्षमस्व तद्देवि सारदे श्रीजिनास्यजे ॥ ४१ ॥
जिनसिद्धसूरिपाठकसाधुमुनींद्राश्चतुर्विधस्य संघस्य ।
विदधतु मंगलमतुलं भुक्तिं मुक्तिं च यच्छंतु ॥ ४२ ॥
सहस्रत्रितयं चैव त्रिशतं च्यशीतिसं[शी त्या]युतम् ।
अनुष्टुप्छंदसां चास्य प्रमाणं निश्चितं बुधैः ॥ ४३ ॥

इति श्रीभट्टारक श्रीशुभचंद्रशिष्याचार्य श्रीसकलभूषणविरचितायामुपदेशरत्नमालायां पुण्यपट्कर्मप्रकाशिकायां तपोदानमाहात्म्यवर्णनोनामाष्टादशपरिच्छेदः संपूर्णः ॥ संवत् १७८३ वर्षे ज्येष्ठमासे शुक्लपक्षे सप्तम्यां तिथौ गुरुवासरे ॥ शुभं भवतु ॥ संवत् १७८३ वर्षे शाके १६४८ प्रवर्तमाने आषाढमासे कृष्णपक्षे पंचमीतिथौ बृहस्पतिवारे श्रीसांगानेरनगरमध्ये महाराजाधिराजमहाराजा श्रीसवाई जैसिंहजीचिरंजी॰ राज्ये प्रवर्त्तमाने पुस्तकं लिखापितं । श्रीमूलसंघे बलात्कारगणे सरस्वतीगच्छे कुंदकुंदाचार्यान्वये नंद्याम्नाये बलात्कारगणे भट्टारकश्रीचंद्रकीर्तिस्तत्पट्टे भट्टारकश्रीदेवेंद्रकीर्तिस्तत्पट्टे भट्टारकश्रीनरेंद्रकीर्तिस्तत्पट्टे भट्टारकश्रीसुरेंद्रकीर्तिस्तत्पट्टे

भट्टारकश्रीजगत्कीर्तिजी तत्पट्टे भट्टारकश्रीश्रीदेवेंद्रकीर्तिजी तदाम्नाये सावडागोत्रे ---------------

No. 1401.

उपासकाध्ययनम्—वसुनदि ।

आसीत् स्वसमयपरसमयविद् श्रीकुन्दकुन्दसताने

आसी ससमयपरसमयविदू सिरीकुंदकुंदसताणे ।

भव्यजनकुमुदवनशिशिरकर श्रीनन्दिनाम्ना

भव्वयणकुमुयवणसिसिरयरो सिरिणंदिणामेण ॥ ४१ ॥

कीर्तिर्यस्येन्दुशुभ्रा सकलभुवनमध्ये यथेच्छं भ्रमित्वा

कित्ती जस्सिदुसुब्भा सयलभुवणमज्झे जहिच्छं भमित्ता ।

नित्य सा सज्जनाना हृदयवदनश्रोत्रे निवास करोति

णिच सा सज्जणाण हियवयणसोए णिवास करेइ ।

य· सिद्धान्ताम्बुराशिं सुनयतरण आसाद्य लीलायतीर्णो

जो सिद्धतबुरासिं सुणयतरणमासेज्ज लीलावतिण्णो ।

वर्णयितु कः समर्थ सकलगुणगण तस्य प्रगल्भोऽपि लोके

वण्णेउ को समत्थो सयलगुणगण से वियड्ढो वि लोए ॥ ४२॥

शिष्य तस्य जिनेन्द्रशासनरत· सिद्धान्तपारगत·

सिस्सो तस्स जिणिंदसासनरओ सिद्धतपारगओ

क्षान्तिमार्दवलाघवादिदशधा धर्मे नित्योद्युक्तः

खतीमद्दवलाहवाइदसहाधम्ममिम णिच्चुज्जुओ ।

पूर्णेन्दूज्ज्वलकीर्तिपूरितजगच्चारित्रलक्ष्मीधर

पुण्णिदुज्जलकित्तिपूरियजओ चारित्तलच्छीहरो

सजात. नयनन्दिनाममुनि भव्याशयानन्दद·

सजाओ णयनदिनाममुणिणो भव्वासयाणदओ ॥४३॥

शिष्यः तस्य जिनागमजलनिधिवेलातरङ्गधौतमनाः
  सिस्सो तस्स जिणायमजलनिहिवेलातरंगधोयमणो ।
संजातः सकलजगति विख्यातः नेमिचन्द्र इति
  संजाओ सयलजए विक्खाउँ णेमिचंदु त्ति ॥ ४४॥
तस्य प्रसादेन मया आचार्यपरंपरागतं शास्त्रं
  तस्स पसाएण मए आयरियपरंपरागयं सत्थं ।
वात्सल्यादररचितं भविकानामुपासकाध्ययनम्
  वच्छल्लायररइयं भवियाणमुवासयज्झयणं ॥ ४५ ॥
यत् किमपि अत्र भणितं अज्ञायमानेन प्रवचनविरुद्धं
  जं किंपि एत्थ भणियं अयाणमाणेण पवणयविरुद्धं ।
क्षमित्वा प्रवचनानि शोधयित्वा तानि प्रकाशयन्तु
  खमिऊण पवयणाणं सोहित्ता तं पयासंतु ॥ ४६ ॥
षट् शतानि पञ्चाशदुत्तराणि एतस्य ग्रन्थपरिमाणं
  छच्चसया पंण्णासुत्तराणिं एयस्स गन्थपरिमाणं ।
वसुनन्दिना निवद्धं विस्तरितव्यं विदग्धैः
  वसुणंदिणा णिवद्धं वित्थरियव्वं वियड्ढेहिं ॥ ४७ ॥
इत्युपासकाध्ययनं वसुनंदिना कृतमिदं समाप्तम् ॥

No. 1402.

उपासकाध्ययनं सटीकम्—मू० समन्तभद्रः । टी० प्रभाचन्द्रः ।

टी० आ०—समंतभद्रं निखिलात्मबोधनं
  जिनं प्रणम्याखिलकर्मशोधनम् ।
  निबंधनं रत्नकरंडके परं
  करोमि भव्यप्रतिबोधनाकरम् ॥ १ ॥

मू॰अ॰—नमः श्रीवर्धमानाय निर्धूतकलिलात्मने ।
सालोकानां त्रिलोकानां यद्विद्या दर्पणायते ॥ १ ॥
मू॰च॰—जिनपतिपदपद्मप्रेक्षिणी दृष्टिलक्ष्मीः ॥ १४५ ॥
टी॰च॰—दृष्टिलक्ष्मीरपि गुणभूषा अष्टमूलगुणैरलंकृता सम्यक् पुनीतादिति ॥
येनाज्ञानतमो विनाश्य निखिलं भव्यात्मचेतोगतं
सम्यग्ज्ञानमहांशुभिः प्रकटितः सागारमार्गोऽखिलः।
स श्रीरत्नकरंडकामलरविः संसृत्सरिच्छोषको
जीयादेव समंतभद्रमुनिपः श्रीमत्प्रभेंदुर्जिनः ॥१॥

इति प्रभाचंद्रविरचितायां समंतभद्रविरचितोपासकाध्ययनटीकायां पंचमः परिच्छेदः ॥ ॥

No. 1404.

ऋषभनाथचरित्रम्—सकलकीर्त्तिः ।

आ॰—श्रीमंतं त्रिजगन्नाथमादितीर्थकरं परम् ।
फणींद्रेंद्रनरेंद्राच्यं वदेऽनंतगुणार्णवम् ॥ १ ॥
च॰—अष्टाविंशाधिका भोः षट्चत्वारिंशच्छतप्रमाः ।
अस्याद्यर्हच्चरित्रस्य स्युः श्लोकाः पिंडिता बुधैः ॥ १८१ ॥

इति श्रीवृषभनाथचरिते भट्टारकश्रीसकलकीर्तिविरचिते वृषभनाथनिर्वाणगमनवर्णनो नाम विंशः सर्गः ॥ ग्रंथसंख्या ॥४६२८॥

स्वस्तिश्री। अथसंवत्सरेऽस्मिन् श्रीनृपतिविक्रमादित्यराज्ये संवत् १७१० वर्षे शाके १५७६ प्रवर्त्तमाने मार्गशिरमासे कृष्णपक्षे प्रतिपदातिथौ बुधवासरे मृगशिरनक्षत्रे सिद्धियोगे श्रीमूलसंघे नद्याम्नाये बलात्कारगणे सरस्वतीगच्छे

कुंदकुंदाचार्यान्वये भट्टारकश्रीपद्मनंदिदेवास्तत्पट्टे भट्टारकश्रीशुभचंद्रदेवास्तत्पट्टे भट्टारकश्रीजिनचंद्रदेवास्तत्पट्टे भट्टारकश्रीप्रभाचंद्रदेवाः द्वितीयाशिष्यमंडलाचार्यश्रीभुवनकीर्तिदेवास्तत्पट्टे मंडलाचार्यश्रीधर्मकीर्त्तिदेवास्तत्पट्टे मंडलाचार्यविशालकीर्तिदेवास्तत्पट्टे मंडलाचार्यश्रीलक्ष्मीचंद्रदेवास्तत्पट्टे मंडलाचार्यश्रीसहस्रकीर्तिदेवास्तत्पट्टे मंडलाचार्यश्रीनेमिचंद्रदेवास्तत्पट्टे मंडलाचार्यविद्याप्रधानचारुचारित्रोद्वहनवादीभकुंभविदारणैककेसरिस्मरसारंगविदारणैकमृगेंद्रपंचाचारचरणचतुरभेदाभेदरत्नत्रयाराधकश्रीयशःकीर्त्तिदेवास्तत्पट्टे मंडलाचार्यसर्वसत्यदयोपेताः शश्वद्धर्मोपदेशका विकथादिविनिर्मुक्ताः तृणहेमसमोपमाः श्रीभानुकीर्तिदेवास्तत्पट्टे मंडलाचार्यमौनव्रतधारणधीराः सर्वांगश्रुतसागराः क्षमादिदशधाधर्मयुक्ता जितपरीषहाः सकलगुणमणिगणाभरणभूषितविग्रहाः श्रीश्री १०८ श्रीश्रीभूषणजी, तदाम्नाये खंडेलवालान्वये राहणिवास्तव्ये पतिसाह श्रीस्याहज्यहां विजयराजराज्ये राजाधिराजमहाराजश्रीजसवंतसिंहराज्ये राठोडगोत्रे विख्यातविराजमाने धरातलविख्यातपाटणीगोत्रे साहडवर तस्य भार्या डालमदे(वी)तयोः पुत्राः षट् ... श्रीभूषणजीतच्छिष्यब्रह्मरूपचंद्रः तस्मै प्रदत्तम् ॥

No. 1405.

आराधनाकथाकोशः—ब्रह्मनेमिदत्तः।

आ°—श्रीमद्भव्याब्जसद्भानूल्लोकालोकप्रकाशकान्।
आराधनाकथाकोशं वक्ष्ये नत्वा जिनेश्वरान्॥ १ ॥

नमस्तस्मै[स्यै]सरस्वत्यै सर्वविज्ञानचक्षुषे ।
यस्या सम्प्राप्यते नाम्ना पारं सज्ञानवारिधे ॥ २ ॥
रत्नत्रयपवित्राणां मुनीनां गुणशालिनाम् ।
वंदेऽहं बोधसिंधूनां पादपद्मद्वयं सदा ॥ ३ ॥
इत्यागमभारतीसाधुपादपद्मस्य चिंतनम् ।
अस्तु मे सत्कथारम्भप्रासादकलशश्रिये ॥ ४ ॥

श्रीमूलसंघे वरभारतीये
गच्छे बलात्कारगणेऽतिरम्ये ।
श्रीकुंदकुंदाख्यमुनीन्द्रवंशे
जातः प्रभाचन्द्रमहायतींद्रः ॥ ५ ॥
देवेंद्रचन्द्रार्कसमर्चितेन
तेन प्रभाचन्द्रमुनीश्वरेण ।
अनुग्रहार्थं रचितं सुवाक्यै-
राराधनासारकथाप्रबंधः ॥ ६ ॥
तेन क्रमेणैव मया स्वशक्त्या
श्लोकैः प्रसिद्धैश्च निगद्यते सः ।
मार्गे न किं भानुकरप्रकाशे
स्वलीलया गच्छति सर्वलोकः ॥ ७ ॥

अथ श्रीजिनसूत्रेण कथ्यते विमलश्रिये ।
आराधनेति किं नाम सतां सन्तोषहेतवे ॥ ८ ॥
सम्यग्दर्शनबोधवृत्ततपसां संसारनिच्छेदिना
शक्त्या भक्तिभरेण सद्गुरुमतात्स्वर्गापवर्गश्रिये ।
उद्योतोद्यमने तथा च नितरां निर्वाहनं साधनं
पूतं निस्तरणं महामुनिवरैराराधनेतीरिता ॥ ९ ॥

प०—यातः[जातः]श्रीमति मूलसंघतिलके सारस्वते सद्गुभे
गच्छे स्वच्छतरे प्रसिद्धमहिमा श्रीकुंदकुंदान्वये।
श्रीजैनागमसिंधुवर्धनविधुर्यैद्वज्जनैः सेवितः
श्रीमत्सूरिमतल्लिका गुणनिधिर्जीयात्प्रभानंद्रयाक्[नंद्रकः]॥६९
श्रीमज्जैनपदाब्जसारमधुकृच्छ्रीमूलसंघाग्रणीः
सम्यग्दर्शनसाधुबोधविलसच्चारित्रचूडामणिः।
विद्यानंदिगुरुप्रपट्टकमलोल्लासप्रदो भास्करः
श्रीभट्टारकमल्लिभूषणगुरुर्भूयात्सदा शर्मणे॥ ७०॥
श्रीसर्वज्ञविशुद्धभक्तिनिरतो भव्यौघसंबोधकः
कामक्रूरकरींद्रदर्पदलने कंठीरवो निष्ठुरः।
ज्ञानध्यानरतः प्रसिद्धमहिमा रत्नत्रयालंकृतः
कुर्याच्छर्म सतां प्रमोदजनकः श्रीसिंहनंदी गुरुः॥ ७१॥
प्रोद्यत्सम्यक्त्वरत्नो जिनकथितमहासप्तभंगीतरंगै-
र्निधूतैकांतमिथ्यामतमलनिकरः क्रोधनक्रादिदूरः।
श्रीमज्जैनेंद्रवाक्यामृतविशदरसः श्रीजिनेंदुप्रवृद्धि-
र्जीयान्मे सूरिवर्यो व्रतनिचयलसत्पुण्यपण्यः श्रुताब्धिः॥७२
तेषां पादपयोजयुग्मकृपया श्रीजैनसूत्रोचिताः
सम्यग्दर्शनबोधवृत्ततपसामाराधनासत्कथाः।
भव्यानां वरशांतिकांतिविलसत्कीर्तिप्रमोदं श्रियं
कुर्युः संरचिता विशुद्धशुभदाः श्रीनेमिदत्तेन वै॥७३॥
इति कथाकोशे भट्टारकश्रीमल्लिभूषणशिष्यब्रह्मनेमिदत्तविरचिते
श्रीजिनपादपूजाफलदृष्टांतकथावर्णनायां चतुर्थः परिच्छेदः समाप्तः॥
संवत् १६१४ वर्षे महासुदि ८ भृगुवासरे

No. 1407.

करकण्डुचरित्रम्—जिनेन्द्रभूषणः ।

आ°—पार्श्वनाथजिनं वंदे विश्वविघ्नौघनाशनम् ।

कमठोपसर्गदैत्यारिनाशनं सौख्यकारणम् ॥ १ ॥

च°—वक्तुं सर्वमिह क्षमः किल भवेत्कस्योत्तमा भारती॥१५॥

इति श्रीमुमुक्षुसिद्धांतचक्रवर्तिश्रीकुंदकुंदाचार्यानुक्रमेण श्रीभट्टारकविश्वभूषणपट्टाभरणश्रीब्रह्महर्षसागरात्मजश्रीभट्टारकजिनेंद्रभूषणविरचिते श्रीमज्जिनेंद्रपुराणांतर्गतभगवत्पूजाफलव्यावर्णने श्रीकरकंडुसहस्रारकाप्तिवर्णनो नाम चतुर्थोधिकारः संपूर्णः ॥

करकंडुकथा संपूर्णा ॥

No. 1409.

कार्त्तिकेयानुप्रेक्षा सटीका—मू° मा° कार्त्तिकेयसाधुः ।

टी° शुभचन्द्रः ।

टी° आ°—शुभचंद्रं जिनं नत्वानंतानंतगुणार्णवम् ।

कार्त्तिकेयानुप्रेक्षायाष्टीकां वक्ष्ये शुभश्रिये ॥१॥

अथ स्वामिकार्त्तिकेयो मुनींद्रोऽनुप्रेक्षां व्याख्यातुकामः मलगालनमंगलावाप्तिलक्षणमाचष्टे ।

मू° आ°—तिहुवणतिलयं देवं वंदित्ता तिहुवणिंदपरिपुज्जं ।

वोच्छं अणुपेहाउ भवियजणाणंदजणणीओ ॥१॥

मू° च°—बारस अणुवेक्खाउ भणिया हु जिणागमानुसारेण ।

जो पढइ सुणइ भावइ सो पावइ उत्तमं सोक्खं ॥४८८

टी° च°—श्रीमूलसंघेऽजनि नंदिसंघ-

वरो बलात्कारगणः प्रसिद्धः ।

श्रीकुंदकुंदो वरसूरिवर्यो
विभाति भाभूषणभूषितांगः ॥ २॥
तदन्वये श्रीमुनिपद्मनंदी
ततोऽभवच्छ्रीसकलादिकीर्तिः ।
तत्पट्टधारी भुवनादिकीर्त्तिः
श्रीज्ञानभूपो वरचित्तभूपः ॥ ३ ॥
तदन्वये श्रीविजयादिकीर्त्ति-
स्तत्पट्टधारी शुभचंद्रदेवः ।
तेनेयमाकारि विशुद्धटीका
श्रीमत्सुमत्यादिसुकीर्त्तिकीर्त्तिः ॥ ४ ॥

सूरिश्रीशुभचंद्रेण वादिपर्वतवज्रिणा ॥
त्रिविद्येनानुप्रेक्षाया वृत्तिर्विरचिता वरा ॥ ५ ॥
श्रीमद्विक्रमभूपतेः परिमिते वर्षे शते षोडशे
माघे मासि दशाग्रवह्निमहिते ख्याते दशम्यां तिथौ
श्रीमच्छ्रीमहिसारसारनगरे चैत्यालये श्रीगुरोः
श्रीमच्छ्रीशुभचद्रदेवविहिता टीका सदा नंदतु ॥६॥
वर्णिश्रीक्षेमचद्रेण विनयेन कृतार्थना ॥
शुभचद्रगुरो स्वामिन् कुरु टीकां मनोहराम् ॥७॥
तेन श्रीशुभचंद्रेण त्रैविद्येन गणेशिना ।
कार्त्तिकेयानुप्रेक्षाया वृत्तिर्विरचिता वरा ॥८॥
तथा साधुसुमत्यादिकीर्त्तिना कृतप्रार्थना [प्रार्थना कृता] ।
सार्थीकृता समर्थेन शुभचद्रेण सूरिणा ॥९॥
भट्टारकपदाधीशा मूलसघे विदांवराः ।
रमावीरेंदुचिद्रूपगुरवो हि गणेशिनः ॥१०॥

लक्ष्मीचंद्रगुरुः स्वामी शिष्यस्तस्य सुधीयशाः ।
वृत्तिर्विस्तारिता तेन श्रीशुभेंदुप्रसादतः ॥ ११ ॥

इति श्रीस्वामिकार्त्तिकेयटीकायां त्रिविद्यविद्याधरपट्भाषाकविचक्रवर्त्तिभट्टारकश्रीशुभचंद्रविरचितायां धर्म्मानुप्रेक्षायां द्वादशोऽधिकारः ॥ १२ ॥

No. 1418.

जम्बूद्वीपप्रज्ञप्तिसंग्रहः—मा० पद्मनन्दिः।

आ०—देवासुरिंदमहिदे दसद्धरूवूणकम्मपरिहीणे ।
केवलणाणालोए सद्धम्मुवएसदा अरुहे ॥ १ ॥...
ते वंदिऊण सिरसा वोच्छामि जहाकमेण जिणदिट्ठं ।
आयरियपरंपरया पणत्तिं दीवजलधीणं ॥ ६ ॥

च०—विबुधवइमउडमणिगणकरसलिलसुद्धे[धो]यचारुपयकमलं ।
धरपउमणंदिणमियं वीरजिणंदं णमंसामि ॥ १७५ ॥

इय जंबूदीवपणत्तिसंगहे पमाणपरिच्छेदो नाम तेरसो उद्देसो सम्मत्तो ॥ १३ ॥

No. 1420.

जम्बूस्वामिचरित्रम्-जिनदासः।

आ०—श्रीवर्धमानतीर्थेशं वंदे मुक्तिवधूवरम् ।
कारुण्यजलधिं देवं देवाधिपनमस्कृतम् ॥ १ ॥

च०—श्रीकुंदकुंदान्वयमौलिरत्नं
श्रीपासनंदीर्विदितः पृथिव्याम् ।
सरस्वतीगच्छविभूषणं च
बभूव भव्यालिसरोजहंसः ॥ २३ ॥
ततोऽभवत्तस्य जगत्प्रसिद्धे
पट्टे मनोज्ञे सकलादिकीर्त्तिः ।

महाकविः शुद्धचरित्रधारी
निर्मंथराजा जगति प्रतापी ॥ २४ ॥
जयति सकलकीर्त्ति[र्तेः]पादपंकेजभानु-
र्जगति भुवनकीर्त्तिर्विश्वविख्यातकीर्त्तिः ।
बहुयतिजनयुक्तः सर्वसावद्यमुक्तः
कुसुमशरविजेता भव्यसन्मार्गनेता ॥ २५ ॥
विबुधजननिषेव्यः सत्कृतानेककाव्यः
परमगुणनिवासः सद्गुणालीविलासः ।
विजितकरणमारः प्राप्तसंसारपारः
स भवतु गतदोषः शर्मणे वः सतोषः॥२६॥
पट्टप्रमादेस्तपसो विधाता
क्षमाभिधः श्रीनिलयं धरित्र्याम् ।
जीयाज्जितानेकपरीषहारिः
संबोधयन् भव्यगणं चिरं सः ॥ २७ ॥
भ्रातास्ति तस्य प्रथितः पृथिव्यां
सद्ब्रह्मचारी जिनदासनामा ।
तेनेति तेने चरितं पवित्रं
जम्ब्वादिनामा [म्नो] मुनिसत्तमस्य॥२८॥
देशे विदेशे सततं विहारं
विलन्रता येन कृताः सुश्लोकाः ।
विशुद्धसर्वज्ञमतप्रवीणाः
परोपकारप्रततत्परेण ॥ २९ ॥
स ब्रह्मचारी किल धर्मदास-
स्तस्यास्ति शिष्यः कविकुटसत्पः ।

सौजन्यवल्लीजलद कृतोऽयं
तद्योगतो व्याकरणप्रवीण ॥ ३० ॥
कविर्महादेव(इति)प्रसिद्ध-
स्तन्मित्रमास्ते द्विजवंशरत्नम् ।
महीतले नूनमसौ कृतश्च
साहाय्यतस्तस्य सुधर्महेतो ॥ ३१ ॥
मथ कृतोऽयं जिननाथभक्त्या
गुणानुरागात्[रागाच्च]महामुनीनाम् ।
पूजाभिधानाद्रहितेन नित्यं
महाप्रशस्त परमार्थबुद्ध्या ॥ ३२ ॥

ये शृण्वति चरित्रमुत्तममिद श्रीजबूनाम्नो मुने-
र्नानाचित्रकथाविभूषितमतिप्राचीण्यसबोधनम् ।
तेषा स्याद्बहुपुण्यकर्मनिपुणा बुद्धि शुभ भूरि च
त्यक्त्वाशेषभवप्रसूतसुखसार्थस्याशु धर्मास्पद(म्) ॥ ३३ ॥
पठनीय पाठनीय शास्त्रमेतन्मुनीश्वरै ।
जबूस्वामिचरित्राढ्य रोमाञ्चजनन नृणाम् ॥ ३४ ॥
क्षतव्य शारदे देवि यदत्र स्खलित मया ।
मोहप्रमादवशात श्रुनाध्वौ[श्रुताब्धौ]को न मुह्यति ॥ ३५ ॥
जबूस्वामी जिनाधीशो भूयान्मागल्यसिद्धये ।
भवता भुवि भो भव्या श्रीवीरातिमकेवली ॥ ३६॥
एकविंशप्रमाणानि शतानि च चरित्रके ।
त्रिंशद्युक्तानि श्लोकाना शुभानु सति निश्चितम् ॥३७॥
इति श्रीजबूस्वामिचरित्रे विद्युच्चरमहामुनिसर्वार्थसिद्धिगमनो नामैकादश सर्ग ॥११॥ स० ३० वर्षे चैत्रसुदि १ रविवारे

No 1423.

ज्ञानार्णवगद्यटीका—श्रुतसागरः ।

आ०—शिरोऽयं वैनतेयश्च स्मरश्चास्यैव कीर्त्तितः ।
अणिमादिगुणानर्घ्यरत्नाधिर्बुधैर्मतः ॥ १ ॥

ष०—आचार्यैरिह शुद्धतत्त्वमतिभिः श्रीसिंहनंद्याद्यैः
संप्रार्थ्य श्रुतसागरं कृतिवरं भाष्यं शुभं कारितम्
गद्यानां गुणवत्प्रियं विनयतो ज्ञानार्णवस्यांतरे
विद्यानंदिगुरुप्रसादजनितं देयादमेयं सुखम् ॥

इति श्रीज्ञानार्णवस्थितगद्यटीका तत्त्वत्रयप्रकाशिनी समाप्ता ॥ ॥

No. 1429.

त्रिषष्टिलक्षणमहापुराणसंग्रहः—

शकनृपकालाभ्यंतरविंशत्यधिकाष्टशतमिताब्दांते ।
मंगलमहार्थकारिणि पिंगलनामनि[1] समस्तजनसुखदे ॥३५॥
पंचम्यामाश्विने गोयुजि[2] दिवसवरे मंत्रिवारे[3] बुधांशे
पूर्वायां[4] सिंहलग्ने धनुषि धरणिजे[5] वृश्चिकार्के[6] तुलायाम् ।
सार्पे[7] शुक्रे कुलीरे[8] रविजसुरगुरौ[9] निष्ठितं भव्यवर्यैः
प्राप्तेज्यं शास्त्रसारं जगति विजयते पुण्यमेतत्पुराणम् ॥३६॥

यावद्धराजलनिधिर्गगनं हिमांशु-
स्तिग्मद्युतिः सुरगिरिः ककुभां विभागाः ।
तावत्सतां वचसि चेतसि पूतमेत-
च्छ्रोतव्यतास्थितिमुपैति महापुराणम् ॥ ३७ ॥

धर्मोत्र मुक्तिपदमत्र ( कवित्वमत्र )
तीर्थेशिनां चरितमत्र महापुराणे ।
यद्वा कवींद्रजिनसेनमुखारविंद-
निर्यद्वचांसि न मनांसि हरंति केषाम् ॥ ३८ ॥

महापुराणस्य पुराणपुंसः
पुरा पुराणे तदकारि किंचित् ।
कवीशिनानेन यथा न काव्य-
चर्चासु चेतोविकलाः कवींद्राः ॥ ३९ ॥

कविवरजिनसेनाचार्यवर्यार्यमासौ
मधुरिमणि न वाच्य नाभिसूनोः पुराणे ।
तदनु च गुणभद्राचार्यवाचो विचित्राः
सकलकविकरींद्रव्रातसिंहो जयंति ॥४० ॥

---

१. एकपञ्चाशत्तमे संवत्सरे वर्त्तमाने २ किरणयुक्ते—अर्थादाश्विनशुक्लपंचम्याम् ३ गुरुवारे ४ कन्याख्ये पूर्वाषाढनक्षत्रे ५ धनराशौ मंगले स्थिते चंद्रे च स्थिते सति ६ वृश्चिकसंक्रांतौ ७ सार्पे राहौ सति बुधे च सति ८ कर्कराशौ शुक्रे सति ९ रविजेन शनिनोपलक्षित सुरगुरुस्तस्मिन्

यदि सकलकवींद्रप्रोक्तसूक्तप्रचार-
श्रवणसरसचेतास्तत्त्वमेवं सखेऽस्याः ।
कविवरजिनसेनाचार्यवक्त्रारविंद-
प्रणिगदितपुराणाकर्णनाभ्यर्णकर्णः॥ ४१ ॥

धर्मः कश्चिदिहास्ति नैतदुचितं वक्तुं पुराणे महत्
श्रव्याः किं तु कथास्त्रिषष्टिपुरुषाख्यानं चरित्रार्णवः ।
कोऽप्यस्मिन्कविता गुणोस्ति कवयोऽप्येतद्वचोऽब्जालयः
कोऽसावत्र कविः कवींद्रगुणभद्राचार्यवर्यः स्वयम् ॥४२॥

इत्यार्षे भगवद्गुणभद्राचार्यप्रणीते त्रिषष्टिलक्षणमहापुराण-
संग्रहे गुरुक्रमवर्णनो नाम सप्तसप्ततितमं पर्व ॥७७॥
समाप्तमिदं महापुराणम् ॥ १७७४ वर्षे

No. 1399.

स एव—स एव ।

प०—४२इत्यार्षे त्रिषष्टिलक्षणमहापुराणसंग्रहे भगवद्गुणभद्राचार्य-प्रणीते प्रशस्तिव्यावर्णनं नाम सप्तसप्ततितमं पर्व समाप्तं च महापुराणमिति ॥ संवत् १६३२ वर्षे मार्गसुदि एकादशी तिथौ रविवासर उत्तराभाद्रपदानक्षत्रे श्रीमूलसंघे नंद्याम्नाये बलात्कारगणे सरस्वतीगच्छे श्रीकुंदकुंदाचार्यान्वये भ० श्रीपद्मनंदिदेवास्तत्पट्टे भ० श्रीशुभचंद्रदेवास्तत्पट्टे भ० श्रीजिनचंद्रदेवास्तत्पट्टे भ० श्रीप्रभाचन्द्रदेवास्तच्छिष्यभ० श्रीधर्मचंद्रदेवास्तच्छिष्यभ० श्रीललितकीर्तिदेवास्तच्छिष्यमंडलाचार्यश्रीचंद्रकीर्तिदेवास्तदाम्नाये खंडेलवालान्वये श्रीपार्श्वनाथजिनचैत्यालये मालपुरवास्तव्ये समस्तश्राविकाभिः ज्ञानकल्याणकार्थं लिखाप्य भ० श्रीचंद्रकीर्तितच्छिष्यब्रह्मदासाय दत्तम् ॥

No. 1430

त्रैलोक्यप्रज्ञप्तिः—मू० मा० शुभचन्द्रः।

आ०—अट्ठविहकम्मवियला णिट्ठियकज्जा पणट्ठसंसारा।
दिट्ठसयलत्थसारा सिद्धा सिद्धिं मम दिसतु ॥ १ ॥

च०—चुण्णिसरूवं अत्थं करणसरूवपमाण होइ किं जत्तं।
अट्ठसहस्सपमाणं तिलोयपण्णत्तिणामाए ॥ ८० ॥ ८०००
एवमाइ य परंपरागइ तिलोयपण्णत्तीए सिद्धो।
लोयसरूवणिरूवणपण्णत्ती णाम णवमो महाहियारो सम्मत्तो
मग्गप्पभावणट्ठं पवयणभत्तिं पवोधिदेन मया।
भणिद गंथ पवरं सोहंतु बहुसुदा इरिया ॥
तिलोयपण्णत्ती सम्मत्ता ॥

अथ प्रशस्तिपाठः।

वृषभो यः श्रियं कुर्याद्वृषभांको वृषाभर्णीः।
ध्वस्ता रागादयो येन दोषाः सिंहेन वा मृगाः ॥ १ ॥
चंद्रप्रभो जिनो जीयाच्चंद्राभोपि तनुश्रिया ॥
निःकलंकः कलानेको भ्रांतिहीनस्तमोगतः ॥ २ ॥
शांतिः शांतिकरो भूयात्षोडशस्तीर्थनायकः।
चकार जगतः शांतिं यो धर्मामृतवर्षणैः ॥ ३ ॥
श्रीवीरं च महावीरं वर्धमानं च सन्मतिम्।
महांतं प्रणमामीशं कलौ कल्पतरूपमम् ॥ ४ ॥
यदालम्ब्य जना यांति पारं ससारवारिधेः।
अनंतमहिमाढ्यं तज्जैनं जयति शासनम् ॥ ५ ॥
जयतु गौतमस्वामिप्रमुखा गणनायकाः।
सूरयो जिनचंद्रांताः श्रीमंतः क्रमदेशकाः ॥ ६ ॥

वर्षे नवैकपंचैक १९११ पूरणे विक्रमेनतः ।
ज्येष्ठमासे सिते पक्षे पंचम्या भौमवासरे ॥ ७ ॥
अधोमध्योर्ध्वलोकस्य यस्यां प्रज्ञापकं मतम् ।
तस्याश्रिलोक्यप्रज्ञप्तेरेश लेखयितुर्भुवे ॥ ८ ॥
गिजंबूद्वीपपदे ... See my Secong Re fort P. 136

No. 1431.

त्रैलोक्यसार. सटीकः—मू॰ मा॰ नेमिचन्द्रः ।

टी॰आ॰—त्रिभुवनचंद्रजिनेंद्र भक्त्या नत्वा त्रिलोकसारस्य ।
वृत्तिरियं किंचिज्ज्ञप्रबोधनाय प्रकाश्यते विधिना॥१॥
मू॰आ॰—बलगोविंदसिहामणिकिरणकलावरुणचरणणहकिरणं ।
विमलयरणेमिचंदं तिहुवणचंदं णमसामि ॥ १ ॥
च॰—उक्तार्थमेव विशेषतो गाथाद्वयेनाह ॥
वरमज्झिमअवराणं दलक्कमं भद्दसालणदणगा ।
णंदीसरगविमाणगजिणालया होंति जेट्ठा हु ॥ १६१ ॥
इति त्रैलोक्यसारः संपूर्णः ॥

No. 1432.

धन्यकुमारचरित्रम्—ब्रह्मनेमिदत्तः ।

आ॰—श्रीमंतं तं जिनं नत्वा केवलज्ञानलोचनम् ।
वक्ष्ये धन्यकुमारस्य वृत्तं भव्यानुरंजनम् ॥१॥
च॰—गच्छे श्रीमति मूलसंघतिलके सारस्वतीये शुभे
विद्यानंदिगुरुप्रपट्टकमलोल्लासप्रदो भास्करः ।
-ज्ञानध्यानरतः प्रसिद्धमहिमा चारित्रचूडामणिः
श्रीभट्टारकमल्लिभूषणगुरुर्जीयात्सतां भूतले ॥ ९२ ॥

इति श्रीधन्यकुमारचरिते भट्टारकश्रीमल्लिभूषणशिष्यब्रह्मनेमिदत्तविरचिते धन्यकुमारमहामुनिसर्वार्थसिद्धिगमनो नाम पञ्चमोऽधिकारः संपूर्णः ॥

No 1434

धर्मरत्नाकरः—जयसेन ।

आ०—लक्ष्मीं निरस्तनिखिलापदमाप्नुवन्तो
लोकप्रकाशरवयः प्रभवन्ति भव्याः ।
यत्कीर्त्तिकीर्तनपरा जिनवर्धमानं
तं नौमि कोविदनुतं स्वधिया सुधर्मम् ॥ १ ॥

च०—गोपी मथानवद्या जगति विजयतां
सा सखी मुक्तिलक्ष्म्याः ॥ ६६ ॥

इति धर्मरत्नाकरे उक्तानुक्तशेषविशेषसूचको विंशतितमोऽवसरः ।

श्रीवर्धमाननाथस्य मेदार्यो दशमोऽजनि ।
गणभृद्दशधा धर्मो यो मूर्त्तो वा व्यवस्थितः ॥ १ ॥
मेदार्येण महर्षिभिर्विहरता तेपे तपो दुश्चरं
श्रीखण्डिल्लकपत्तनातिकरणाभ्यर्णप्रभाजासदा ।
शाठ्येनाप्युपतन्वता सुरतरुप्रख्या जनानां श्रियं
तेनागीयत झाडवागड इति स्वैको हि संघोऽनघः ॥ २ ॥
धर्मज्योत्स्नां विकिरति सदा यत्र लक्ष्मीनिवासा -
प्यापुश्चित्रं सकलकुमुदायत्युपेता विकाशम् ।
श्रीमान्सोभून्मुनिजननुतो धर्मसेनो गणीदु-
स्तस्मिन् रत्नत्रितयसदनीभूतयोगीद्रवशे ॥ ३ ॥
भजन्वादीद्रगान पुरिपुरि नितरां प्राप्नुवन्नुद्यमानं
तन्वन् शास्त्रार्थदानं रुचिरुचिरुचिरः सर्वथा निर्निदानम् ।

विद्यादर्शोपमानं दिशिदिशि निकिरन् स्वं यशो योऽसमानं
तेभ्यः श्रीशांतिषेणः समजनि सुगुरुः पापधूलीसमीरः ॥ ४ ॥

यत्रास्पदं विदधती परमागमश्री-
रात्मन्यमन्यत सतीत्वमिदं नु चित्रम् ।
वृद्धा च संततमनेकजनोपभोग्या
श्रीगोपसेनगुरुराविरभूत्स तस्मात् ॥ ५ ॥

उत्पत्तिस्तपसां पदं च यशसामन्यो रविस्तेजसा-
मादिः सद्गुणानां [सां] निधिः सुतरसामासीन्निधिः श्रेयसाम् ।
आवासो गुणिनां पिता च शमिनां माता च धर्मात्मनां
न ज्ञातः कलिना जगत्प्रथितलिना श्रीभावसेनस्ततः ॥ ६ ॥

ततो जातः शिष्यः सकलजनतानंदजनन-
प्रसिद्धः साधूनां जगति जयसेनाख्य इह सः ।
इदं चक्रे शास्त्रं जिनसमयसारार्थनिचितं
हितार्थं जंतूनां स्वमतिविभवाद्गर्वविकलः ॥ ७ ॥

यावद्द्योतयतः सुधाकररवी विश्वं निजांशूत्करै-
र्यावल्लोकमिमं बिभर्ति धरणी यावच्च मेरुः स्थिरः ।
रत्नांशुच्छुरितोत्तरंगपयसो यावत्पयोराशय-
स्तावच्छास्त्रमिदं महद्भिरनिशं स्तात्पठ्यमानं श्रिये ॥ ८ ॥

इति धर्मरत्नाकरः समाप्तः ।

No. 1111.

पञ्चास्तिकायप्राभृत सटीकम्—

मू॰ कुंदकुन्दाचार्य. । टी॰ ब्रह्मदेवजी ।

टी॰ आ॰—स्वसंवेदनसिद्धाय जिनाय परमात्मने ।
शुद्धजीवास्तिकायाय नित्यानंदचिते नमः ॥ १ ॥

अथ श्रीकुमारनंदिसैद्धांतदेवशिष्ये [सैद्धांतिकदेवशिष्यैः] प्रसिद्धकथान्यायेन पूर्वविदेहं गत्वा वीतरागसर्वज्ञसीमंधरस्वामितीर्थंकरपरमदेवं दृष्ट्वा च तन्मुखकमलविनिर्गतदिव्यवर्णश्रवणादवधारितपदार्थसमूहैः बुद्धात्मतत्त्वादिसारार्थं गृहीत्वा पुनरप्यागतैः श्रीमत्कुंदकुंदाचार्यदेवैः पद्मनंद्याद्यपरनामधेयैरंतस्तत्त्वबहिस्तत्त्वगौणमुख्यप्रतिपत्त्यर्थम् । अथवा शिवकुमारमहाराजादिसंक्षेपरुचिशिष्यप्रतिबोधार्थं विरचिते पंचास्तिकायप्राभृतशास्त्रे यथाक्रमेणाधिकारशुद्धिपूर्वकं तात्पर्यार्थव्याख्यानं कथ्यते । तद्यथा । प्रथमस्तावत्, इंदसयवंदियाणमित्यादि पाठक्रमेणैकादशोत्तरशतगाथाभिः पंचास्तिकायषड्द्रव्यप्रतिपादनरूपेण प्रथमो महाधिकारः । अथवा स एवामृतचंद्रिकाटीकाभिप्रायेण अधिकशतपर्यंतश्च । तदनंतरमभिवंदिऊण शिरसा इत्यादि पंचाशद्गाथाभिः सप्ततत्त्वपदार्थव्याख्यानरूपेण द्वितीयो महाधिकारः । अथवा स एव टीकाभिप्रायेणाष्टचत्वारिंशद्गाथापर्यंतश्च । अथानंतरं जीवसहावो णाण इत्यादि विंशतिगाथाभिर्मोक्षमार्गमोक्षस्वरूपकथनमुख्यत्वेन तृतीयोधिकार इति समुदायेनैकाशीत्युत्तरशतगाथाभिर्महाधिकारत्रयं ज्ञातव्यम् ॥

मू॰ आ॰—इदसयवदियाणं तिहुअणहितमधुरविसदवका[क्का]णं।
अंतातीदगुणाणं णमो जिणाणं जिदभयाणं ॥ १ ॥

मू॰ च॰—एगो मे सस्स हो अप्पा णाणदंसणलक्खणो ।
सेसा मे वाहिरा भावा सव्वे संयोगलक्खणा ॥

टी॰ च॰—समुदायेनैकादशोत्तरशतगाथाभिः पञ्चास्तिकायप्राभृतः समाप्तः ।

जिनबिंबं जिनागारं जिनपूजां जिनस्तुतिम् ।
यः करोति नरस्तस्य न किंचिद्दुर्लभं भवेत् ॥

इति श्रीपञ्चास्तिकायजीकी टीका ब्रह्मदेवजीकृता संपूर्णा ।

## No. 1447.

॥ परमात्मप्रकाश सटीक -मू० योगीन्द्रदेव ।

मू०भा० जे जाया झाणग्गियए कम्मकलक डहेवि ।
णिच्चनिरजणणाणमया ते परमप्पणवेवि ॥ १ ॥

मू० च० परमपयगयाण भासउ दिव्वकाउ
मणसि मुणिवराण मुक्खदो दिव्वजोउ ।
विसयसुहरयाण दुल्लहो जो हु लोये
जयउ सिवसरूवो केवलो कोवि बोहो ॥ ३४५ ॥

## No 1448

परीक्षामुख सटीकम्–मू० माणिक्यनन्दि ।

भा०—नतामरशिरोरत्नप्रभाप्रोतनखत्विषे ।
नमो जिनाय दुर्वारमारवीरमदच्छिदे ॥ १ ॥
अकलकवचोम्भोधेरुद्दध्रे येन धीमता ।
न्यायविद्यामृत तस्मै नमो माणिक्यनदिने ॥ २ ॥
प्रमेदुवचनोदारचन्द्रिकाप्रसरे सति ।
मादृशा क्व नु गण्यते ज्योतिरिंगणसन्निभा ॥ ३ ॥
तथापि तद्वचोऽपूर्वरचनारुचिर सताम् ।
चेतोहर भृत यद्वन्नद्या नवघटे जलम् ॥ ४ ॥
वैजेयप्रियपुत्रस्य हीरपस्योपरोधत ।
शातिषेणार्थमारब्धा परीक्षामुखपजिका ॥ ५ ॥

श्रीमन्न्यायावारपार [न्यायपारावार]स्यामेयप्रमेयरत्नसरस्यावगाहनमव्युत्पन्नै कर्तु न पार्यत इति तदवगाहनाय पोतप्रायमिद प्रकरणमाचार्य• प्राह । तत्प्रकरणस्य च सबधादित्रयापरिज्ञाने सति प्रेक्षावता प्रवृत्तिर्न स्यादिति तत्त्रयानुवादपुर सर वस्तुनिर्देशपर प्रतिज्ञाश्लोकमाह।

प्रमाणादर्थसंसिद्धिस्तदाभासाद्विपर्ययः ।
इति वक्ष्ये तयोर्लक्ष्म सिद्धमल्पं लघीयसः ॥ १ ॥

व॰—अकलंकशशांकैर्यत्प्रकटीकृतमखिलमाननिभनिकरम् ।
तत्संक्षिप्तं सूरिभिरुरुमतिभिर्व्यक्तमेतेन ॥ १ ॥

इति परीक्षामुखलघुवृत्तौ प्रमाणाद्याभाससमुद्देशः षष्ठः परिच्छेदः ।

श्रीमान्विजयनामाभूदग्रणीर्गुणशालिनाम् ।
वदरीपालवंशालिव्योमद्युमणिरूर्जितः ॥ १ ॥

तदीयपत्नी भुवि विश्रुतासी-
ज्ञाणांबनामा गुणशीलधामा ।
यां रेवतीति प्रथितांबिकेति
प्रभावतीति प्रवदंति संतः ॥ २ ॥

तस्यामभूद्विश्वजनीनवृत्ति-
र्दानांबुवाहो भुवि हीरपाख्यः ।
स्वगोत्रविस्तारनभोंशुमाली
सम्यक्त्वरत्नाभरणार्चितांगः ॥ ३ ॥

तस्योपरोधवशतो विशदोरुकीर्त्ते-
र्माणिक्यनंदिकृतशास्त्रमगाधबोधम् ।
स्पष्टीकृतं कतिपयैर्वचनैरुदारै-
र्बालप्रबोधकरमेतदनंतवीर्यैः ॥ ४ ॥

इति प्रमेयरत्नमालापरनामधेयपरीक्षामुखवृत्तिः समाप्ता ।

No. 1452.

पाण्डवपुराणम्—शुभचन्द्रः।

आ॰—सिद्धं सिद्धार्थसर्वस्वं सिद्धिदं सिद्धसत्पदम् ।
प्रमाणनयसंसिद्धं सर्वज्ञं नौमि सिद्धये ॥ १ ॥...

भद्रबाहुर्महाभद्रो महाबाहुर्महातपाः ।
स जीयात्सकलं येन श्रुतं ज्ञातं कलौ विदा ॥ १२ ॥
विशाखो विश्रुता शाखा सुशाखो यस्य पातु माम् ।
स भूतले मिलन्मौलिहस्तभूलोकसंस्तुतः ॥ १३ ॥
कुंदकुंदो गणी येनोज्जयंतगिरिमस्तके ।
सोवताद्वादिता ब्राह्मी पाषाणघटिता कलौ ॥ १४ ॥
समंतभद्रो भद्रार्थो भातु भारतभूषणः ।
देवागमेन येनात्र व्यक्तो देवागमः कृतः ॥ १५ ॥
पूज्यपादः सदा पूज्यपादः पूज्यैः पुनातु माम् ।
व्याकरणार्णवो येन तीर्णो विस्तीर्णसद्गुणः ॥ १६ ॥
अकलंकोऽकलंकः स कलौ कलयतु श्रुतम् ।
पादेन ताडिता येन मायादेवी घटस्थिता ॥ १७ ॥
जिनसेनयतिर्जीयाज्जिनसेनः कृतं वरम् ।
पुराणपुरुषात्यार्थपुराणं येन धीमता ॥ १८ ॥
गुणभद्रभदंतोऽत्र भगवान् भातु भूतले ।
पुराणाद्रौ प्रकाशार्थं येन सूर्यायितं लघु ॥ १९ ॥
तत्पुराणार्थमालोक्य धृत्वा सारस्वतं श्रुतम् ।
मानसे पांडवानां हि पुराणं भारतं ब्रुवे ॥ २० ॥

च°—श्रीमूलसंघेऽजनि पद्मनंदी
तत्पट्टधारी सकलादिकीर्त्तिः ।
कीर्त्तिः कृता येन च मर्त्यलोके
शास्त्रार्थकर्त्री सकलापि चित्रा ॥ ६७ ॥
भुवनकीर्त्तिरभूद्भुवनाद्भुते-
र्भुवनभासनचारुमतिः स्तुतः ।

वरतपश्चरणोद्यतमानसो
भवभयाहिखगेट् क्षितिवल्लभी ॥ ६८ ॥

चिद्रूपवेत्ता चतुरश्चिरंतन-
श्चिद्रूपणर्चितपादपद्मक. ।
सूरिश्च चन्द्रादिचयैश्चिनोतु वै
चारित्रशुद्ध[द्धिं] खलु नः प्रसिद्धिदम्[दाम्] ॥ ६९ ॥

विजयकीर्त्तियतिर्मुदितात्मको
जितनतान्यमन.सुगते. स्तुत· ।
अवतु जैनमत सुमतो मतो
नृपतिभिर्भवतो भवतो विभु· ॥ ७० ॥

पट्टे तस्य गुणाबुधिर्व्रतधरो धीमान् गरीयान् वर·
श्रीमच्छ्रीशुभचन्द्र एव विदितो वादीभसिंहो महान् ।
तेनेद चरित विचारसुकर चाकारि चचद्रुचा
पाडो· श्रीशुभसिद्धिसातजनक सिद्ध्यै सुतानां सदा ॥७१॥

चन्द्रनाथचरित चरितार्थं
पद्मनाभचरित शुभचन्द्रम् ।
मन्मथस्य महिमानमतन्द्रो
जीवकस्य चरित च चकार ॥ ७२ ॥

चदनाया· कथा येन दृब्धा [ ब्धा ] नादीश्वरी तथा ।
आशाधरकृतार्चाया वृत्ति( · ) सद्वृत्तिशालिनी ॥ ७३ ॥

त्रिंशच्चतुर्विंशतिपूजन च
सद्वृत्तसिद्धार्चनमाव्यधत्त ।
सारस्वतीयार्चनमत्र शुद्ध
चिंतामणीयार्चनमुच्चरिष्णु ॥ ७४ ॥

श्रीकर्मदाहविधिबंधुरसिद्धसेवां
नानागुणौघगणनाथसमर्चनं च ।
श्रीपार्श्वनाथवरकाव्यसुपंजिकां च
यः संचकार शुभचंद्रयतींद्रचंद्रः ॥ ७५ ॥
उद्यापनमदीपिष्ट पल्योपमविधेश्च यः ।
चारित्रशुद्धितपसश्चतुस्त्रिंशद्द्वादशात्मनः ॥ ७६ ॥
संशयवदनविदारणमपशब्दसुखंडनं परं तर्कम् ।
सतत्त्वनिर्णयं वरस्वरूपसंबोधिनीं वृत्तिम् ॥ ७७ ॥
अध्यात्मपद्यवृत्तिं सर्वार्थापूर्वसर्वतोभद्रम् ।
योऽकृत सद्व्याकरणं चिंतामणिनामधेयं च ॥ ७८ ॥
कृता येनांगप्रज्ञप्तिः सर्वांगार्थप्ररूपिका ।
स्तोत्राणि च पवित्राणि षड्वादाः श्रीजिनेशिनाम् ॥ ७९ ॥
तेन श्रीशुभचंद्रदेवविदुषा सत्पांडवानां परं
दीप्यद्वंशविभूषणं शुभभरभ्राजिष्णु शोभाकरम् ।
शुंभद्वारतनामनिर्मलगुणं सच्छब्दचिंतामणिं
पुण्यत्पुण्यपुराणमत्र सुकरं चाकारि प्रीत्या महत् ॥ ८० ॥
शिष्यस्तस्य समृद्धिबुद्धिविशदो यस्तर्कवेदी य[प]ते
वैराग्यादिविशुद्धिवृंदजनकः श्रीपालवर्णी महान् ।
संशोध्याखिलपुस्तकं वरगुणं सत्पांडवानामिदं
तेनालेखि पुराणमर्थनिकरं पूर्वं वरे पुस्तके ॥ ८१ ॥
श्रीपालवर्णिना येनाकारि शास्त्रार्थसंग्रहे ।
साहाय्यं स चिरं जीयाद्वरविद्याविभूषणः ॥ ८२ ॥
ये शृण्वंति पठंति पांडवगुणं सलेखयंत्यादरा-
ल्लक्ष्मीराज्यनराधिपत्यसुरता चक्रित्वसर्वेशिताम् ।

मुक्त्वा भोगमिद पुराणमखिलं सर्वोभुवत्युन्नता
मुक्तौ ते भवभीमनिम्नजलधिं सतीर्य सात गता ॥८३॥
अर्हंतो ये जिनेंद्रा वरवचनचयै प्रीणयंतः सुभव्यान्
सिद्धा· सिद्धि समृद्धि ददत इह शिव साधव सिद्धिशुद्धा।
दृक्सद्बोध सुवृत्त जिनवरवचन तीर्थराड्मोक्षधर्म-
स्तत्सच्चैत्यानि रम्या जिनवरनिलया संतु नस्ते सुसिद्ध्यै॥८४

यावच्चद्रार्कतारा: सुरपतिसदन तोयधि· शुद्धधर्मो
यावद्भूगर्भदेवा सुरनिलयगिरिर्देवगंगादिनद्य·।
यावत्सकल्पवृक्षास्त्रिभुवनमहिता भारते वे जगत्यां
तावत्स्थेयात्पुराण शुभशतजनक भारत पाडवानाम् ॥८५॥
श्रीमद्विक्रमभूपतेर्द्विकहते स्पष्टाष्टसख्ये शते
रम्येष्टाधिकवत्सरे१६०८ सुखकरे भाद्रे द्वितीयातिथौ ॥
श्रीमद्वाग्वरनीवृतीदमतुले श्रीशाकवाटे पुरे
श्रीमच्छ्रीपुरुपाभिधे विरचित स्थेयात्पुराण चिरम्॥८६

इति श्रीपांडवपुराणे भारतनाम्नि भ० श्रीशुभचद्रप्रणीते ब्रह्मश्रीपालसाहाय्यसापेक्षे पाडवोपसर्गसहनकेवलोत्पत्तिमुक्तिसर्वार्थसिद्धिगमनवर्णन नाम पचविंशतितम पर्व ॥ २५ ॥ सवत् १६९३ वर्षे सहसि मासे कृष्णपक्षे त्रयोदश्या तिथौ भौमवासरे श्रीआदिनाथचैत्यालये श्रीमूलसघे नद्याम्नाये बलात्कारगणे सरस्वतीगच्छे श्रीकुदकुदाचार्यान्वये भट्टारकश्रीपद्मनदिदेवास्तत्पट्टे भ० श्रीशुभचंद्रदेवास्तत्पट्टे भ० जिनचद्रदेवास्तत्पट्टे भ० श्रीप्रभाचद्रदेवा मडलाचार्यश्रीधर्मकीर्त्तिदेवास्तत्पट्टे भ० विशालकीर्त्तिदेवास्तत्पट्टे भ० लक्ष्मीचद्रदेवास्तत्पट्टे भ० सहस्रकीर्त्तिदेवास्तत्पट्टे मडलाचार्यश्रीनेमिचद्रस्तस्मै सत्पात्राय जिनगृहवासिनी श्राविका रूपी तया इद शास्त्र पाडवपुराणाख्य ज्ञानावरणीयकर्मक्षयनिमित्त लिखाप्य प्रदत्तम् ॥

No. 1454.

पुरुषार्थसिद्ध्युपायः सटीक.—मू० अमृतचन्द्रसूरिः ।

टी° आ°—चंद्रप्रभजिनं वार्णी नत्वा गुरुपदांबुजम् ।

पुमर्थसिद्ध्युपायस्य कुर्वे टीकां मनोहराम् ॥१॥

अथ श्रीमान्निर्ग्रंथाचार्यवर्यः श्रीमदमृतचंद्रभट्टारकः कलिकालगणधरदेवः भव्यपुंडरीकेभ्यः पुरुषार्थसिद्ध्युपायं प्रकाशयन्निष्टदेवताविशेषमाशिर्वादात्मकमंगल कथयन्नमस्करोति ।

अथ मूलसूत्रम् ॥

तज्जयति परं ज्योतिः सम समस्तैरनंतपर्यायैः ।

दर्पणतल इव सकला प्रतिफलति पदार्थमालिका यत्र ॥ १ ॥

टी° च°—इत्यमृतचंद्रसूरीणां कृति पुरुषार्थसिद्ध्युपायोऽयम् ।

नाम जिनप्रवचनरहस्यकोशः समाप्त इति ॥ २२७॥

अयं पुरुषार्थसिद्ध्युपायः ग्रंथः इति अमृतचंद्रसूरीणा अमृतचंद्रभट्टारकाणां इय कृतिः इयं कर्त्तव्यता अस्य पुरुषार्थसिद्ध्युपायस्यापरनाम प्रवचनरहस्यकोशो वर्त्तते इति कथनेन समाप्त इति ॥२२७॥

इति श्रीपुरुषार्थसिद्ध्युपायः समाप्तः ॥

No 1462

भद्रबाहुचरित्रम्—रत्ननन्दी ।

आ°—सद्बोधभानुना भित्वा जनानामांतरं तमः ।

यः सन्मतित्वमापन्नः सन्मतिः सन्मतिं क्रियात् ॥१॥

च०—वादीभेंद्रमदप्रमर्दनहरेः दीलामृनामोनिधेः

*शिष्यः श्रीमदनंतकीर्त्तिगणिनः सत्कीर्तिकांतायुतः ।*

*स्मृत्वा श्रीललितादिकीर्त्तिमुनिपं शिक्षागुरुं सद्गुणं*

*चक्रे चारु चरित्रमेतदनघं रत्नादिनंदी मुनिः ॥ ७४ ॥*

इतिहाससमासोयमत्रावहितचेतसाम् ।
आभवंति शुभान्युच्चैर्निर्जयंत्यशुभान्यपि ॥ ६ ॥
श्रीपार्श्वनाथकाकुत्स्थचरितं येन कीर्त्तितम् ।
तेन श्रीवादिराजेन दृब्धा याशोधरी कथा ॥ ७ ॥

No. 1495.

वर्धमानचरित्रम्—असगः ।

आ°—श्रियं त्रिलोकीतिलकायमाना-
मात्यंतिकीं ज्ञातसमस्ततत्त्वम् ।
उपागतं सन्मतिमुज्ज्वलोक्तिं
वंदे जिनेंद्रं हतमोहतंद्रम् ॥१॥

च°—कलशः कल्याणमुख्यैः सपदि जिनपतेः पंचमं तस्य कृत्वा
भूयान्नोऽस्यस्य भक्त्या ध्रुवमनतिचिरात्सिद्धिसौख्यस्य सिद्धिः ।
इत्यंतर्भितयंतः स्तुतिमुखरमुखास्तं प्रदेशं परीत्य .
प्रीताः शक्रादयः स्वं प्रतिययुरमरा धाम संभाज्यसंपत् ॥१०१।

इत्यसगकृते श्रीवर्धमानचरिते महाकाव्ये भगवन्निर्वाणगमनो नामाष्टादशः सर्गः ॥ १८ ॥

मुनिचरणरजोभिः सर्वदा भूतधात्र्यां
प्रणतिसमयलग्नैः पावनीभूतमूर्धा ।
उपशम इव मूर्त्तः शुद्धसम्यक्त्वयुक्तः
पटुमतिरिति नाम्ना विश्रुतः श्रावकोऽभूत् ॥१॥
तनुमपि तनुतां यः सर्वपर्वोपवासै-
स्तनुमनुपमधीः स प्रापयन् संचिनोति ।
सततमपि विभूतिं भूयसीमन्नदान-
प्रभृतिभिरुपपुण्यं कुंदशुभ्रं यशश्च ॥ २ ॥

भक्तिं परामविरतां समपक्षपातां-
मातन्वती मुनिनिकायचतुष्टयेपि ।
वेरिसिरित्यनुपमा भुवि तस्य भार्या
सम्यक्त्वशुद्धिरिव मूर्त्तिमती सदाभूत् ॥ ३ ॥
पुत्रस्तयोरसग इत्यवदातकीर्त्यो-
रासीन्मनीषिनिवहप्रमुखस्य शिष्यः ।
चंद्रांशुशुभ्रयशसो भुवि नागनंद्या-
चार्यस्य शब्दसमयार्णवपारगस्य ॥ ४ ॥
सद्वृत्तं दधता स्वभावमृदुना निःश्रेयसप्रार्थिना
साधूनां हृदयोपमेन शुचिना संप्रेरितः श्रेयसा ।
एतत्सादरमार्यनंदिगुरुणा सिद्ध्यै व्यधत्तासगः
कीर्त्युत्कीर्त्तनमात्रचारुचरितं श्रीसन्मतेः सन्मतेः ॥ ५ ॥
इति वर्धमानचारित्रं समाप्तम् ॥

संवत् १६७९ वर्षे आश्विनमासे शुक्लपक्षे नवमीदिने सोमवारे श्रीमूलसंघे सरस्वतीगच्छे बलात्कारगणे नंद्याम्नाये भट्टारकश्रीप्रभाचंद्रधर्मचंद्रललितकीर्तिचंद्रकीर्त्यादीनां पदे श्रीमद्देवेंद्रकीर्त्तिस्तत्प्रियांतेवासिनो मंदीकृतमिथ्यात्वादिनो हर्षकीर्तिनाम्नो मुनेरिदं पुस्तकं चिरं स्थेयात् ॥

No. 1477.

विद्यातत्त्वे भारतीयोपदेशः ।

आ०—ॐ ऐं ह्रीं ह्रैं दिव्यार्केंद्रस्थानभयशैलशेखराय नमः । समुल्लसमंदनाचल(नल) हिलोलहरीभराश्रितपूर्वोत्तरप्रदेश—

न०—सत्पात्रदानपरपुरुषमंतरेण न केवलावबोधाचरणं पशुपाश-निराकरणं च विदध्यात् ॥

इति श्रीदुघ[श्रीमदु]त्सर्गापवादयत्रनैकांतोपनिषत्सु विद्यातत्त्वे भारतीयोपदेशे त्रयोदशोऽध्यायः ॥

No. 1483.

संमेदशिखरिमाहात्म्यम्—दीक्षितदेवदत्तः ।

आ°—ध्यात्वा यत्पदपाथोजं भव्याः संसारपारगाः ।
सारात्सारं सदाधारं तमर्हंतं नमाम्यहम् ॥ १ ॥
गुरुं गणेशं वाणीं च ध्यात्वा स्तुत्वा प्रणम्य च ।
समेदशैलमाहात्म्यं प्रकटीक्रियते मया ॥ २ ॥
जिनेंद्रभूषणयतिर्यतिधर्मपरायणः ।
तस्योपदेशात्संमेदवर्णने मद्गिरोत्सुका ॥ ३ ॥
भट्टारकपदस्थायी स यतिः सत्कविप्रिय. ।
भवाब्धितरणायेह सत्कथापोतसज्जकः ॥ ४ ॥
माहात्म्यपूर्त्तिसिद्ध्यर्थं वंदे सिद्धगणं हृदि ।
सद्बुद्धिं ते प्रयच्छंतु वाणी मे काव्यरूपिणीम् ॥ ५ ॥
संमेदशैलवृत्तांतो महावीरेण भाषितः ।
गौतमं प्रति भूयः स लोहाचार्येण धीमता ॥ ६ ॥
तत्सद्वाक्यानुसारेण देवदत्ताख्यसत्कविः ।
संमेदशैलमाहात्म्यं प्रकटीकुरुतेऽधुना ॥ ७ ॥

च°—१२६ ॥ इति श्रीभगवल्लोहाचार्यानुक्रमेण श्रीभट्टारकजिनेंद्रभूषणोपदेशाच्छ्रीमद्दीक्षितदेवदत्तकृते श्रीसमेदशिखरिमाहात्म्ये समाप्तिसूचनको नाम एकविंशतितमोऽध्यायः ॥२१॥ समाप्तोऽयं ग्रंथः ॥

No. 1492.

सारसूक्तावलिः ।

आ°—वीरं विश्वगुरुं नत्वा कृत्वा यत्नेन संग्रहम् ।
सदोपकारिसूक्ताली स्वान्यपाठाय लिख्यते ॥ १ ॥

च०—वामनावतारे हि वामनेन श्रीरैवतके श्रीनेमिनाथाय(तने) बलिबंधसामर्थ्यार्थं तपस्तेपे इति तत्र (प्रभासपुराणे) कथा। इति श्रीसारसूक्तावली संपूर्णा॥ संवत् १६६० वर्षे माघवदि ७ शुक्रे श्रीमंडपाचले पंडितप्रवर पं० श्रीमुनिचंद्रगणिकृते पं० शिवहंसेन लिखिता।

No. 1498.

सुभाषितार्णवः।

आ०—ॐ नमः सिद्धेभ्यः॥ धर्मपद्धतिः॥
चंद्रनाथं जिनं नत्वा जितघातिचतुष्टयम्।
सुभाषितार्णवं वक्ष्ये ज्ञानविज्ञानकारणम्॥ १॥

च०—आदौ चित्ते ततः काये सतां संलीयते जरा।
असतां तु पुनः काये चित्ते नैव कदाचन॥ १३॥

इति सुभाषितार्णवग्रंथः समाप्तः॥ संवत् १६०९ वर्षे भाद्रपदमासे शुक्लपक्षे पंचमीदिवसे बुधवासरे स्वातिनक्षत्रे ऐंद्रयोगे…

No. 1496.

सुदर्शनचरित्रम्—नेमिदत्तः।

आ०—नत्वा पंचगुरून् भक्त्या पंचमीगतिनायकान्।
सुदर्शनमुनेश्चारु चरित्रं रचयाम्यहम्॥ १॥

च०—श्रीमूलसंघे वरभारतीये
गच्छे बलात्कारगणेतिरम्ये।
श्रीकुंदकुंदाख्यमुनींद्रवंशे
जातः प्रभाचंद्रमहामुनींद्रः॥ ४७॥
पट्टे तदीये मुनिपद्मनंदी
भट्टारको भव्यसरोजभानुः।

जातो जगत्त्रयहितो गुणरत्नसिंधुः
कुर्यात्सतां सारसुखं यतीशः ॥ ४८ ॥
तत्पट्टपद्माकरभास्करोऽत्र
देवेंद्रकीर्तिर्मुनिचक्रवर्ती ।
तत्पादपंकेजसुभक्तियुक्तो
विद्यादिनंदी चरितं चकार ॥ ४९ ॥

तत्पट्टेऽजनि मल्लिभूषणगुरुश्चारित्रचूडामणिः
संसारांबुधितारणैकचतुरश्चिंतामणिः प्राणिनाम् ।
सूरिः श्रीश्रुतसागरो गुणनिधिः श्रीसिंहनंदी गुरुः
सर्वे ते यतिसत्तमाः शुभतराः कुर्वंतु वो मंगलम् ॥५०॥

गुरूणामुपदेशेन सच्चरित्रमिदं शुभम् ।
नेमिदत्तो व्रती भक्त्या भावयामास शर्मदम् ॥ ५१ ॥

इति श्रीसुदर्शनचरिते पंचनमस्कारमाहात्म्यप्रदर्शके ब्रह्मनेमिदत्तविरचिते सुदर्शनमहामुनिमोक्षलक्ष्मीसंप्राप्तिव्यावर्णनो नाम द्वादशोधिकारः समाप्तः ॥ १२ ॥

No. 1502.

हरिवंशपुराणम्— जिनसेनाचार्यः ।

आ°—सिद्धं ध्रौव्यव्ययोत्पादलक्षणं द्रव्यसाधनम् ।
जैनं द्रव्याद्यपेक्षातः साधनाद्यथ शासनम् ॥ १ ॥
शुद्धज्ञानप्रकाशाय लोकालोकैकभानवे ।
नमः श्रीवर्धमानाय वर्धमानजिनेशिने ॥ २ ॥

म°—प्रतापवद्याखिलराजके नृपे
प्रशासति क्ष्मातलमुग्रशासने ।
जरत्कुमारे जनितादराः प्रजाः
प्रकाममापुः प्रमदं धरातले ॥ १ ॥

कलिंगराजस्य नृपस्य देहजा
जरत्कुमारस्य वधूर्वधूत्तमा ।
सुखेन लेभे जगतः सुखावहं
वसुध्वजं राजकुलध्वजं सुतम् ॥ २ ॥

स तत्र यूनि व्यवसायिनि क्षितिं
जरत्कुमारे हरिवंशशेखरे ।
निधाय यातस्तपसे वनं सतां
कुलव्रतं तीव्रतपोनिषेवणम् ॥ ३ ॥

सुतोऽभवच्चंद्र इव प्रजाप्रियो
वसुध्वजाच्चासुवसुर्वसूपमः ।
सभीमवर्मास्य कलिंगपालक-
स्तदन्वयेऽभीयुरनेकशो नृपाः ॥ ४ ॥

कपिष्टनामान्वयभूषणस्त्वभू-
दजातशत्रुस्तनयस्ततोऽभवत् ।
स शत्रुसेनोऽस्य जितारिरंगज-
स्तदंगजोऽय जितशत्रुरीश्वरः ॥ ५ ॥

भवान्न किं श्रेणिक वेत्ति भूपतिं
नृपेंद्रसिद्धार्थकनीयसीपतिम् ।
इमं प्रसिद्धं जितशत्रुमाख्यया
प्रतापवंतं जितशत्रुमंडलम् ॥ ६ ॥

जिनेंद्रवीरस्य समुद्भवोत्सवे
तदागतः कुंडपुरं सुहृद्वृतः ।
सुपूजितः कुंडपुरस्य भूभृता
नृपोऽयमाखंडलतुल्यविक्रमः ॥ ७ ॥

विहृत्य पूज्योपि महीं महीयसां
महामुनिर्मोचितकर्मबंधनः ।
इयाय मोक्षं जितशत्रुकेवली
निरंतसौख्यप्रतिबद्धमक्षयम् ॥ १४ ॥
जिनेंद्रवीरोपि विबोध्य संततं
समंततो भव्यसमूहसंततिम् ।
प्रपद्य पावानगरीं गरीयसीं
मनोहरोद्यानवरे तदीयके ॥ १५ ॥
चतुर्थकाले ऽर्धचतुर्थमासकै-
र्विहीनताविश्चतुरब्दशेषके ।
स कार्तिके स्वातिषु कृष्णभूतसु-
प्रभातसंध्यासमये स्वभावतः ॥ १६ ॥
अघातकर्माणि निरुद्धयोगको
विधूय घातींधनवद्विबंधनः ।
विबंधनस्थानमवाप शंकरो
निरंतरायोरुसुखानुबंधनम् ॥ १७ ॥
स पंचकल्याणमहामहेश्वरः
प्रसिद्धनिर्वाणमहे चतुर्विधैः ।
शरीरपूजाविधिना विधानतः
सुरैः समभ्यर्च्यत सिद्धशासनः ॥ १८
ज्वलत्प्रदीपालिकया प्रवृद्धया
सुरासुरैर्दीपितया प्रदीप्तया ।
तदा स्म पावानगरी समंततः
प्रदीपिताकाशतला प्रकाशते ॥ १९ ॥

तथैव च श्रेणिकपूर्वभूभुजः
प्रकृत्य कल्याणमहं सहस्रजाः।
प्रजग्मुरिंद्राश्च सुरैर्यथायथं
प्रयाचमाना जिनबोधिमर्थिनः ॥ २० ॥

ततश्च लोकः प्रतिवर्षमादरा-
त्प्रसिद्धदीपालिकयात्र भारते।
समुद्यतः पूजयितुं जिनेश्वरं
जिनेंद्रनिर्वाणविभूतिभक्तिभाक् ॥ २१ ॥

त्रयः क्रमात्केवलिनो जिनात्परे
द्विषष्टिवर्षांतरभाविनोऽभवन्।
ततः परे पंच समस्तपूर्विण-
स्तपोधना वर्षशतांतरे गताः ॥ २२ ॥

त्र्यशीतिके वर्षशते तु रूपयुक्
दशैव गीता दशपूर्विणः शते।
द्वये च विंशेंगभृतोपि पंच ते
शते च साष्टादशके चतुर्मुनिः ॥ २३ ॥

गुरुः सुभद्रो जयभद्रनामा
परो यशोबाहुरनंतरस्ततः।
महार्हलोहार्यगुरुश्च ये दधुः
प्रसिद्धमाचारमहांगमत्र ते ॥ २४ ॥

महातपोवृद्धिनयंधरःश्रुता-
मृषिश्रुतिं गुप्तपदादिकां दधन्।
मुनीश्वरोऽन्यः शिवगुप्तसंज्ञको
गुणैः स्वमर्हद्बलिरप्यधात्पदम् ॥ २५ ॥

समंदरार्योपि च मित्रती रविं
गुरू तथान्यौ बलदेवमित्रकौ ।
विवृद्धमानाय त्रिरत्नसयुंतः
[विवर्धमानत्रिकरत्नसंयुत ]
श्रियान्वितः सिंहबलश्च वीरवत् ॥ २६॥
स पद्मसेनो गुणपद्मखण्डभृत्
गुणाग्रणीर्व्याघ्रपदादिहस्तकः ।
स नागहस्ती जितदण्डनामभृ-
त्स नंदिषेणः प्रभुदीपसेनक. ॥ २७ ॥
तपोधनः श्रीधरसेननामकः
सुधर्मसेनोपि च सिंहसेनक· ।
सुनंदिषेणेश्वरसेनकौ प्रभू
सुनंदिषेणाभयसेननामकौ ॥ २८ ॥
स सिद्धसेनोभयभीमसेनकौ
गुरू परो तौ जिनशांतिषेणकौ ।
अखण्डषट्खंडमखण्डितस्थितिः
समस्तसिद्धांतमधत्त योऽर्थत. ॥ २९ ॥
दधार कर्मप्रकृतिं श्रुतिं च यो
जिताक्षवृत्तिर्जयसेनसद्गुरु· ।
प्रसिद्धवैयाकरणप्रभाववा-
नशेषराद्धांतसमुद्रपारगः ॥ ३० ॥
तदीयशिष्योऽमितसेनसद्गुरुः
पवित्रपुन्नाटगणाग्रणी गणी ।

जिनेंद्रसच्छासनवत्सलात्मना
तपोभृता वर्षशताधिजीविना ॥ ३१ ॥
सुशास्त्रदानेन वदान्यताऽमुना
वदान्यमुख्येन भुवि प्रकाशिता ।
तदग्रजो धर्मसहोदयः शमी
समग्रधीर्धर्म इवात्तविग्रहः ॥ ३२ ॥
तपोमयीं कीर्तिमशेषदिक्षु यः
क्षिपन् बभौ कीर्त्तितकीर्तिषेणभाः ।
तदग्रशिष्येण शिवाग्रसौख्यभा-
गरिष्टनेमीश्वरभक्तिभारिणा ॥ ३३ ॥
स्वशक्तिभाजा जिनसेनसूरिणा
धियाल्पयोक्ता हरिवंशपद्धतिः ।
यदत्र किंचिद्रचितं प्रमादतः
परस्परव्याहतिदोषदूषितम् ॥ ३४ ॥
तदप्रमादास्तु पुराणकोविदाः
सृजंतु जंतुस्थितिशक्तिवेदिनः ।
प्रशस्तवंशो हरिवंशपर्वतः
क्व मे मतिः क्वाल्पतराल्पशक्तिका ॥ ३५ ॥
अनेन पुण्यप्रभवस्तु केवलं
जिनेंद्रवंशस्तवनेन वाञ्छितः ।
न काव्यबंधव्यसनानुबंधतो
न कीर्त्तिसंतानमहामनीषया ॥ ३६ ॥
न काव्यगर्वेण न चान्यवीक्षया
जिनस्य भक्त्यैव कृता कृतिर्मया ।

जिनाश्चतुर्विंशतिरत्र कीर्त्तिताः
सुकीर्तयो द्वादश चक्रवर्तिनः ॥ ३७ ॥
नव त्रिधा सीरिहरिप्रतिद्विप-
स्त्रिपष्टिरित्थं पुरुषाः पुराणगाः ।
अवांतरेनेकशतानि पार्थिवा
महीचरा व्योमचराश्च भूरिशः ॥ ३८ ॥
क्षितौ चतुर्वर्गफलोपभोगिनः
पुराणमुख्येऽत्र यशस्विनः स्तुताः ।
अगण्यपुण्यं हरिवंशकीर्तिना
यदत्र गण्यं गुणसंकितं मया ॥ ३९ ॥
फलादमुष्मात्तु मनुष्यलोकजा
भवंतु भव्या जिनशासनस्थिताः ।
जिनस्य नेमेश्चरितं चराचरं
प्रसिद्धजीवादिपदार्थभासनम् ॥ ४० ॥
प्रवाच्यतां वाचकमुख्यसज्जनैः
सभागतैः श्रोत्रपुटैः प्रपीयताम् ।
जिनेंद्रनामग्रहणं भवत्यलं
ग्रहादिपीडापगमस्य कारणम् ॥ ४१ ॥
प्रवाच्यमानं दुरितस्य दारुण
सतां समस्तं चरितं किमुच्यते ।
कुर्वंतु व्याख्यानमनन्यचेतसः
परोपकाराय च मुक्तिहेतवे ॥ ४२ ॥
सुमंगलं मंगलकारिणामिदं
निमित्तमप्युत्तममर्थिनां सताम् ।

महीपसर्गे शरणं सुशांतिकृत्
सुशाकुनं शास्त्रमिदं जिनाश्रयम् ॥ ४३ ॥
प्रशासनाच्छासनदेवताश्च या
जिनांश्चतुर्विंशतिमाश्रिताः सदा ।
हिताः सतामप्रतिचक्रयान्विताः
प्रयाचिताः सन्निहिता भवंतु ताः ॥४४ ॥
गृहीतचक्रा प्रतिचक्रदेवता
तथोज्जयंतालयसिंहवाहिनी ।
शिवाय यस्मिन्निह सन्निधीयते
क्व तत्र विघ्नाः प्रभवंति शासने ॥ ४५ ॥
महोरगा भूतपिशाचराक्षसा
हितप्रवृत्तौ जनविघ्नकारिणः ।
जिनेशिनां शासनदेवतागण-
प्रभावशक्त्याथ समं श्रयंति ते ॥ ४६ ॥
प्रकाममोक्षांकितकामसिद्धयः
प्रसिद्धधर्मार्थविरोधलब्धयः ।
भवंति तेषां स्फुटमल्पयत्नतः
पठंति भक्त्या हरिवंशमत्र ये ॥ ४७ ॥
निवार्य मात्सर्यमवार्यवीर्यया
धिया सुधैर्योर्जितया जिनादराः ।
अनार्यवर्याः सहिताः सपर्यया
पुराणमार्याः प्रथयंतु विष्टपे ॥ ४८ ॥
किं मेऽथवा प्रार्थनया यतस्ततः
स्वभावतो विश्वभरक्षमाविद. ।

पयोधरोन्मुक्तमित्रांबु भूधरा
विध्या[धा]य मूर्धि प्रथयंतु भूतले ॥ ४९ ॥
सुपृष्टमुत्स्पष्टमुदात्तशब्दकै-
र्नवं पुराणं च पुराणवारि सत् ।
महानुकूलैर्जनतासरित्कुलै-
श्चतुःसमुद्रांतमिदं प्रतन्यते ॥ ४९ ॥
जयंति देवाः सुरसंघसेविताः
प्रजातिशांतिप्रदशांतशासनाः ।
विशुद्धकैवल्यविनिद्रदृष्टयः
सुदृष्टतत्त्वा भुवने जिनेश्वराः ॥ ५० ॥
जयत्यजय्या जिनधर्मसंततिः
प्रजास्विह क्षेम सुभिक्षमस्त्वतः ।
सुखाय भूयात्प्रतिवर्षवर्षणैः
सुजातसस्या वसुधाऽसुधारिणाम् ॥ ५१ ॥
शाकेष्वब्दशतेषु सप्तसु दिशं पंचोत्तरेषूत्तरां
पातींद्रायुधनाम्नि कृष्णनृपजे श्रीवल्लभे दक्षिणाम् ।
पूर्वां श्रीमदवंतिभूभृति नृपे वत्सादिराजेऽपरां
सौर्याणामथ मंडलं जययुते वीरे वराहेऽवति ॥ ५२ ॥
कल्याणैः परिवर्धमानविपुलश्रीवर्धमाने पुरे
श्रीपार्श्वालयनन्नराजवसतौ पर्याप्तशेषः पुरा ।
पश्चाद्दोस्तटिकाप्रजाप्रजनितप्राज्यार्चनावर्च[जि]ने
शांतेः शांतिगृहे जिनेश्वरचिते वंशो हरीणामयम् ॥ ५३ ॥
व्युत्सृष्टापरसंघसंततिबृहत्पुन्नाटसंघान्वये
प्राप्तः श्रीजिनसेनसूरिकविना लाभाय बोधेः पुनः ।

दृष्टो[ष्टो]ऽयं हरिवंशपुण्यचरितः श्रीपार्वतः सर्वतो
व्याप्ताशामुखमंडलः स्थिरतरः स्थेयान्[त्]पृथिव्यां चिरम् ५४

इत्यरिष्टनेमिपुराणसंग्रहे हरिवंशे जिनसेनाचार्यस्य कृतौ गुरुपर्व-
कमलवर्णनो नाम षट्षष्टितमः सर्गः ॥ ६६ ॥

| नंबर | ग्रन्थनाम. | कर्तृनाम. | पत्राणि. | पङ्क्तयः | अक्षराणि | संवत् | अपूर्णादि वक्तव्यम्. |
|---|---|---|---|---|---|---|---|
| २३ | कात्यायनसूत्रस्य पद्धति | याज्ञिकदेव | ५१ | ११ | २८ | ... | अपूर्णा. |
| २४ | तस्यैव प्रथमाध्यायपद्धति .. | स एव .. | १४ | १३ | २६ | १७१८ | |
| २५ | तस्यैव द्वितीयतृतीयाध्यायपद्धती | स एव ... | ५४ | ९ | २८ | १८६८ | |
| २६ | तस्यैव पञ्चमाध्यायपद्धति. . | स एव ... | १६ | ९ | २८ | १८६९ | |
| २७ | कारीरीष्टिहौत्रप्रयोग. ........ | ... .. | २ | ११ | ३२ | . | |
| २८ | कालाग्निरुद्रोपनिषद् ... ... | ... .. | ४ | १० | ४३ | .. | |
| २९ | केनोपनिषद्भाष्यम् . . ..... | शंकराचार्य. | १४ | १० | ४० | ... | पत्रे २ ३ ६. |
| ३० | तदेव मूलसहितम् .. .. . . . | भा० स एव | १४ | १२ | ४८ | ... | |
| ३१ | कौषीतक्यारण्यकम् ... ... | .. . | १३ | ६ | २६ | १५७४ | अध्यायाः १५ |
| ३२ | गणपत्युपनिषद् .. ..... ... | .. ... | ३ | ११ | २२ | १८५० | |
| ३३ | सैव ... ............... ... | ... . | ३ | ८ | २४ | १८३१ | |
| ३४ | गृह्यसूत्रम् ...... ...... .. ... | आपस्तम्ब | ११ | ११ | ३६ | ... | |
| ३५ | गृह्यसूत्रम् ..... ..... .... | गोभिलः | ३६ | ८ | ३२ | १७५७ | |
| ३६ | गृह्यसूत्रम् ................ ..... | पारस्कर ... | ३४ | ८ | ३२ | १७३३ | |
| ३७ | तदेव ..... ...... . ... .. . . . | स एव ... | ४० | ७ | ३२ | ... | |
| ३८ | तस्यैव भाष्यम् .. . ...... | हरिहरः . ... | १९५ | ८ | २४ | १८८९ | काण्डौ २- |
| ३९ | गृह्यसूत्रम् ... .. . . ... | सांखायन | ४६ | ७ | ३० | १८१० | |
| ४० | गोपालतापिनी सटीका ....... | टी० विश्वेश्वर | २६ | १४ | ३२ | ... | |
| ४१ | चरणव्यूह ... ... .. . . | .... | ९ | ८ | १२ | ... | |
| ४२ | चरणव्यूहः श्राद्धकल्पश्च . .. | .. ... | २० | ८ | ३६ | १७७८ | |
| ४३ | छन्दोविचयः . ...... .. ...... | . ... .. | ६ | ९ | ३६ | १११७ | |
| ४४ | स एव .. ...... ........ ... | . .. | ९ | ८ | ३४ | १७२५ | |
| ४५ | छान्दोग्योपनिषद् ...... .. ... | ...... | ५८ | ११ | २६ | ... | |
| ४६ | सैव .. ..... ..... .. .. .. . | ... .. | ८४ | ८ | २४ | १९१३ | |
| ४७ | ताण्ड्यब्राह्मणं सामवेदस्य .. | .. .. | १३९ | ९ | २४ | .. | अपूर्णम्. |
| ४८ | तदेव .... ..... ...... .. ... | . .. | १०३ | १० | ३३ | ... | अपूर्णम्. |
| ४९ | तैत्तिरीयोपनिषद् .... ...... . | ... . | १४ | ८ | २४ | ... | |
| ५० | दर्शपौर्णमासहौत्रम्-सांखायनस्य | .. ... | २२ | ७ | ३१ | .. | |
| ५१ | दर्शपौर्णमासहौत्रं आश्वलायनस्य | . .. | २० | ७ | ३४ | .. | |
| ५२ | दर्शपौर्णमासेष्टिप्रयोग. ...... | .. . | ४२ | ७ | ३२ | १९०८ | |
| ५३ | देवताध्याय ..... ........... | ...... | ३ | १० | ३२ | १६९१ | |
| ५४ | धनुर्वेद ... .... . ...... . | ...... | ८ | १२ | ४८ | १८६९ | |
| ५५ | नारायणोपनिषद् .... ..... | .. .. | २ | ९ | ४६ | ... | |
| ५६ | निघण्टुः .. ... . . . . ... | . . | २१ | ७ | ३४ | | |
| ५७ | निरुक्तम् ...... . . . | यास्क. .... | १७८ | ८ | ३६ | . | |

| नंबर. | ग्रन्थनाम | कर्तृनाम. | पत्राणि | पङ्क्तयः | अक्षराणि | संवत्. | अपूर्णादि वाच्यम |
|---|---|---|---|---|---|---|---|
| १५० | उत्सर्गप्रयोगः ............ | ... | १२ | ८ | २८ | . | |
| १५१ | उत्सर्गमयूख ........ | नीलकण्ठ. | ३१ | ११ | १८ | १७१८ | |
| १५२ | उत्सर्गोपाकर्मप्रयोगः ...... | रामकृष्ण | ५४ | ९ | २८ | १८७३ | |
| १५३ | उपाकर्मप्रयोग ........ | . | २० | ७ | २८ | .. | |
| १५४ | ऋषितर्पणं सचरणव्यूहम् ...... | .... | १० | १० | २१ | ... | |
| १५५ | औदीच्यप्रकाश ........ | ... | १६ | १४ | २२ | .. | अपूर्णः |
| १५६ | कर्मप्रदीप ........ | . | ५३ | ७ | २० | १९११ | |
| १५७ | कलादीक्षा ........ | . .. | २४६ | १६ | १७ | .. | शारदालिपि |
| १५८ | कात्यायनीशान्ति ...... | .... | १५ | १६ | २१ | .. | |
| १५९ | कालनिर्णयदीपिका ..... | रामाचार्य (रामचन्द्राचार्य) | २८ | १० | ३२ | ... | |
| १६० | सैव ...................... | स एव | २६ | १० | ४० | १६१० | |
| १६१ | सैव सविवरणा ........ | वि० नृसिंहाचार्य | ६३ | १४ | ५५ | १८५० | पत्राणि ३५, ३६, ५० न सन्ति. |
| १६२ | कालमाधव- सटीक ...... | माधवाचार्यः | १७ | १२ | ६० | ... | अपूर्ण |
| १६३ | काशीतत्त्वम् ........... | रघुनाथेन्द्रसरस्वती | ५ | ११ | ३२ | १८२० | |
| १६४ | कुण्डतत्त्वप्रदीप. सटीकः ..... | बलभद्रसूरि | ३७ | १५ | ४० | १८८८ | |
| १६५ | कुण्डमण्डपसिद्धि ........ | विठ्ठलदीक्षित. | ५ | १० | ५२ | ... | |
| १६६ | सैव सटीका ........ | स एव .... | २१ | १६ | २२ | .. | |
| १६७ | कृत्यरत्नम् ................ | हरिभट्टसूनु खण्डेराय | २३ | १८ | ३६ | ... | अपूर्णम्. |
| १६८ | कृत्यरत्नावली ........... | रामचन्द्र | १५४ | १० | २८ | १८७८ | |
| १६९ | सैव ...................... | स एव ..... | ९४ | ९ | ४० | . | |
| १७० | गणेशपद्धतिः ............ | रघुनाथः | ३३ | ७ | ३६ | ... | |
| १७१ | गर्भाधानादिसंस्कारत्रयम्..... | .... | ७ | १० | ३२ | .. | |
| १७२ | गायत्रीपद्धति ........... | ..... | २१ | ९ | २६ | ... | |
| १७३ | गायत्रीपूजनविधि ...... | रत्ननाथ. | ६० | ८ | १८ | १८७३ | |
| १७४ | गोत्रप्रवरनिर्णय ........ | ..... | ३६ | ९ | ३२ | १६५१ | |
| १७५ | गोत्रप्रवरनिर्णय ........ | सदाराम | ५ | १५ | ५६ | १७०३ | |
| १७६ | ग्रहशान्ति वासिष्ठी ......... | .. | १८ | ८ | ११ | १८३१ | |
| १७७ | ग्रहशान्तिपद्धति ......... | यादूराम. | ६४ | १७ | ३२ | १८७३ | |
| १७८ | ग्रहस्थापनपद्धति ...... | ..... | १८ | ८ | २१ | ... | |

| नंबर | ग्रन्थनाम | कर्तृनाम | पत्राणि | पङ्क्तयः | अक्षराणि | संवत् | अपूर्णादि का वर्णन |
|---|---|---|---|---|---|---|---|
| २०८ | दशकर्मपद्धति | रामदत्त | ६१ | ९ | २१ | | |
| २०९ | दशकर्मपद्धति भाष्यसहिता | | २२ | ८ | ३२ | १७१८ | अपूर्ण |
| २१० | दशदिनपूरकश्राद्धविधिः | | ८ | ११ | ४० | | प्रथमपत्र नास्ति |
| २११ | दशधेनुदानविधि | | १६ | १७ | ४१ | | |
| २१२ | स एव | | ३६ | १० | ३२ | | अपूर्ण |
| २१३ | दशसंस्कारपद्धति | | ७० | ७ | २८ | | |
| २१४ | दानपञ्चिका | नरराज | २० | ९ | २८ | | अपूर्ण |
| २१५ | दानपद्धति | | ४६ | १२ | ४० | | |
| २१६ | दानमनोहर | | ६७ | १२ | २८ | | अपूर्ण |
| २१७ | दानवाक्यम् | नरराज | ५७ | ९ | २६ | १८८० | प्रथमपत्राणि ४ न सन्ति |
| २१८ | दाहादिकर्मपद्धति | | ८ | ९ | ३० | | |
| २१९ | दीक्षाप्रयोग | | २ | १२ | ३८ | १८०० | |
| २२० | देवप्रतिष्ठापद्धति | | ४५ | १४ | ४० | १८६९ | |
| २२१ | धर्मप्रकाश | माधव | १२५ | १३ | ४८ | | |
| २२२ | धर्मप्रवृत्ति | नारायणभट्ट | १६० | ११ | ३८ | | अन्तिमपत्रं नास्ति |
| २२३ | धर्मसंग्रह | हरिश्चन्द्र | ६० | ७ | २८ | | |
| २२४ | नवकाण्डिका | | ५ | १० | ३० | | |
| २२५ | नवग्रहपद्धति | | १४ | ६ | २२ | | |
| २२६ | नागरनिरूपणम् | | ४३ | ८ | १६ | | |
| २२७ | नान्दीश्राद्धपद्धति | रामदत्त | २२ | ६ | २७ | | |
| २२८ | नित्यकर्मपद्धति | श्रीधराचार्य | २६ | १० | ४६ | | अपूर्ण |
| २२९ | निर्णयदीपक | अचलद्विवेदी | ४९ | १० | ४० | | अपूर्ण |
| २३० | निर्णयामृतम् | अल्लाडनाथ | ३१७ | ८ | २६ | १६८२ | |
| २३१ | नूतनारणिग्रहणविधि | | २ | ११ | ३८ | | |
| २३२ | न्यासपद्धति | त्रिविक्रम | ३१ | ७ | १६ | १९०० | |
| २३३ | पञ्चसंस्कारपद्धति | | ४ | ८ | ४२ | | |
| २३४ | पञ्चसंस्कारप्रमाणविधि | | ७ | ११ | ४२ | | निम्बार्कमतीय |
| २३५ | पञ्चायतनपूजा | नृसिंहाश्रम | १३३ | ९ | ४६ | | प्रथमपत्राणि २० न सन्ति |
| २३६ | पाराशरधर्मशास्त्रम् | पराशर | २४ | ९ | ४० | १८७७ | |
| २३७ | पिण्डपितृयज्ञ | | ६ | ७ | २१ | | |
| २३८ | पितृसांवत्सरिकश्राद्धप्रयोग | | ४ | ११ | ४० | | |

| नंबर. | ग्रन्थनाम. | कर्तृनाम | पत्राणि | पङ्क्तय | अक्षराणि. | संवत् | अपूर्णादि वाच्यम्. |
|---|---|---|---|---|---|---|---|
| २३९ | पुरश्चरणविधि ........ | गोपीनाथ | १५ | १२ | ३७ | ... | |
| २४० | प्रतिष्ठापद्धति ........ | .... | १४ | १२ | २८ | . | |
| २४१ | प्रतिष्ठापद्धति ........ | शंकरभट्ट | ५१ | ७ | १६ | . | |
| २४२ | प्रतिष्ठापद्धति ........ | त्रिविक्रम | ६३ | ८ | २४ | ... | अपूर्णा. |
| २४३ | प्रतिष्ठाविधि ........ | .... | ३ | ९ | ४० | ... | |
| २४४ | प्रयोगपद्धति ........ | गङ्गाधर | ३३ | १० | ३६ | १५४८ | त्रुटिता |
| २४५ | प्रयोगरत्ने षोडश कर्माणि .... | .... | ३२ | १० | ३५ | १८५२ | |
| २४६ | प्रवरमञ्जरी ........ | शंकरदैवज्ञ | ३६ | १० | २६ | ... | |
| २४७ | प्रवराध्याय ........ | .... | ५ | ८ | ३६ | .. | |
| २४८ | प्रायश्चित्तमयूखः ........ | नीलकण्ठ | २३५ | ८ | ४३ | १८२३ | |
| २४९ | प्रायश्चित्तमुक्तावली ........ | दिवाकर | १२० | ११ | ३० | १८७७ | |
| २५० | प्रायश्चित्तेन्दुशेखरः ........ | नागोजीभट्ट | ७४ | १२ | ३२ | ... | |
| २५१ | बृहत्पाराशरधर्मशास्त्रम् ........ | .... | १०६ | १० | ४८ | १७७२ | |
| २५२ | ब्रह्माण्डदानप्रयोगः ........ | .... | ३ | ११ | ४० | ... | |
| २५३ | भगवद्भक्तिविलासः ........ | गोपालभट्ट | ५६ | १३ | ४० | ... | अपूर्णः |
| २५४ | मण्डपोद्वासनप्रयोग ........ | धरणीधरसूनु | ९ | ८ | २० | . | |
| २५५ | मण्डलकारिका ........ | .... | ६ | ९ | ३२ | .. | |
| २५६ | सैव ........ | .... | १३ | ७ | २६ | ... | |
| २५७ | मन्त्राक्षतप्रयोगः ........ | .... | ८ | ११ | ३२ | ... | |
| २५८ | महारुद्रविधानम् ........ | .... | २३ | ८ | २६ | | |
| २५९ | महार्णवनिबन्ध ........ | विश्वेश्वर | ३८६ | ११ | ३२ | १६४२ | |
| २६० | स एव ........ | स एव | १८१ | १६ | ४० | ... | अपूर्ण |
| २६१ | तस्यैव कर्मविपाकप्रकरणम् . | स एव | १६९ | ११ | २६ | १८४१ | |
| २६२ | मान्दसांवत्सरिकश्राद्धप्रयोगः. | .... | ६ | ९ | ३० | .. | |
| २६३ | मातृस्थापनप्रयोग ........ | .... | २ | १२ | २६ | ... | |
| २६४ | माधवीयविवरणम् ........ | तर्कतिलक | ५८ | १३ | २७ | . | प्रथमपत्राणि १४ न सन्ति |
